स्वर्गानन्त्याय धर्मोयं सर्वेषां वर्णलिङ्गिनाम् ।
तस्याभावे च लोकोऽयं संकरान्नाशमाप्नुयात् ॥
सर्वस्यास्य यथान्यायं भूपतिः संप्रवर्तकः ।
तस्याभावे धर्मनाशस्तदभावे जगच्च्युतिः ॥"

चाणक्यस्याप्युक्तिरेवम्—

"राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।
लोकास्तमनुवर्तन्ते यथा राजा तथा प्रजा ॥"

आगमेति—आगम एव दीपस्तेन दृष्टेन; शास्त्रावलोकितेन इति भावः । अध्वना पद्धत्या । लोकयात्रा लोकस्थितिः, जीवनव्यवहारो वा । दिव्यं शास्त्रज्ञानालोकपूर्णम् । व्यवहिताः व्यवधानयुताः; गूढा इत्यर्थः । विप्रकृष्टाः दूरे वर्तमानाः परोक्षाः, ते आदौ येषां, तेषु । न प्रतिहता अनवरुद्धा वृत्तिः प्रचारः यस्य तत्; अकुण्ठितप्रचारम् । **तेनेति**—तेन शास्त्रेण । सतोः विद्यमानयोः । आयते दीर्घे च विशाले महन्ती च, तयोः । अर्थदर्शनेषु स्थितिव्यवहारादिज्ञानेषु । वाह्यविद्यासु राजनीतिव्यतिरिक्तासु संगीतादिविद्यासु । अभिषङ्गम् आसक्तिम् । आगमय आत्मनात्मानं प्रापयेति भावः । कुलविद्यां कुलाय त्वद्राजकुलाय उपयुक्तां विद्यां ज्ञानम् । सः अर्थः तदर्थः राजनीतिविद्या, तस्य अनुष्ठानेन सम्पादनेन । आवर्जिता प्राप्ता शक्तीनां सिद्धिः येन सः । अथवा, आवर्जिते शक्तिः सिद्धिः च येन सः । शक्तिः सामर्थ्यं, सिद्धिः कार्ये साफल्यम्, अस्खलितशासनः अनुल्लङ्घिताज्ञः । शाधि शासनं कुरु; राज्यं रक्षेति भावः । उदधिः समुद्रः एव मेखला काञ्ची यस्याः, ताम् । उर्वीं भूमिं विदर्भदेशम् ।

[विहारभद्रस्य वर्णनम्]

८. एतदाकर्ण्य 'स्थान एव गुरुभिरनुशिष्टम् । तथा क्रियत' इत्यन्तःपुरमविशत् । तां च वार्तां पार्थिवेन प्रमदासंनिधौ प्रसङ्गे-नोदीरितामुपनिशम्य समीपोपविष्टश्चित्तानुवृत्तिकुशलः, प्रसाद-वित्तो गीतनृत्यवाद्यादिष्ववाह्यो वाह्यनारीपरायणः, पटुरय-न्त्रितमुखः, वहुभङ्गिविशारदः, परमर्मान्वेषणपरः, परिहासयिता, परिवादरुचिः, पैशुन्यपण्डितः, सचिवमण्डलादप्युत्कोचहारी,

---

८, एतदिति—एतद् वसुरक्षितवचनम् । स्थाने उचितम् । अव्ययमेतत् । गुरुभिः पितृतुल्यैः मन्त्रिवृद्धैर्भवद्भिः । अनुशिष्टम् उपदिष्ट-मादिष्टं वा । प्रमदानाम् नारीणाम् अन्तःपुरस्त्रीणां सन्निधौ समीपे पुरतः । उदीरितां कथिताम् । चित्तानुवृत्तिकुशलः चित्तस्य मनसः अनुवृत्तिः अनु-वर्तनं मनोभावः, तत्र कुशलः प्रवीणः । प्रसादवित्तः राज्ञः अनन्तवर्मणः प्रसादेन अनुग्रहेण वित्तः प्रसिद्धः ख्यातः सुविदितः । अथवा राज्ञः प्रसादः एव वित्तं धनं यस्य सः; राज्ञः कृपापात्रम् । राज्ञः प्रसादेन वित्तं धनं यस्येति वा । अवाह्यः प्रवीणः । वाह्यनारी परस्त्री, तासु परायणः रतः। अथवा वाह्यनारी वेश्या । अयन्त्रितमुखः असंयतवचनः यत्किञ्चि-द्वादी । वह्वीषु भङ्गिषु वक्रभाषणेषु विशारदः प्रवीणः । परस्य अन्यस्य मर्माणि रहस्यानि छिद्राणि वा, तेषामन्वेषणे अनुसंधाने परः रतः । परि-वादे निंदायां रुचिर्यस्य सः । 'विद्यमानदोषस्याभिधानं परीवादः अविद्यमा-नदोषाभिधानं निन्दा' इति कुल्लूकभट्टः । पैशुन्यं पृष्ठतः दोषाविष्करणं, खलत्वमिति भावः । तत्र पण्डितः बुद्धिमान् । पण्डा अस्य जाता इति पण्डितः । सचिवानां मन्त्रिणां मण्डलं चक्रं, तस्मात् । उत्कोचः गुप्तरूपेण अन्यस्य उचितानुचितकर्मकरणाय धनादेः प्राप्तिः; 'रिश्वत, घूस' इति भाषायाम् । तस्य हारी, तं हर्तुं शीलं यस्येति वा । सकलस्य समस्तस्य

सकलदुर्नयोपाध्यायः, कामतन्त्रकर्णधारः, कुमारसेवको विहारभद्रो नाम स्मितपूर्वं व्यज्ञापयत्*—

[विहारभद्रोपदेशः—पुरोहितनिन्दा]

९. "देव, दैवानुग्रहेण यदि कश्चिद् भाजनं भवति विभूतेस्तमकस्मादुच्चावचैरुपप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्ताः । तथाहि । केचित्प्रेत्य किल लभ्यैरभ्युदयातिशयैराशामुत्पाद्य मुण्डयित्वा शिरो बद्ध्वा दर्भरज्जुभिरजिनेनाच्छाद्य नवनीतेनोपलिप्यानशनं च शाययित्वा सर्वस्वं स्वीकरिष्यन्ति । तेभ्योऽपि घोरतराः पाषण्डिनः[६] पुत्रदारशरीरजीवितान्यपि

दुर्नयस्य दुष्टव्यवहारस्य उपाध्यायः शिक्षकः । कामतन्त्रे कामशास्त्रे कर्णधारः नाविकः, कामशास्त्रज्ञ इति भावः । कुमारसेवकः कुमारावस्थायाः प्रभृति सेवकः । स्मितं पूर्वं यस्मिन् कर्मणि तद् यथा स्यात् तथा ।

९. देवेति—दैवस्य भाग्यस्य अनुग्रहेण कृपया । भाजनं पात्रम् । विभूतेः समृद्ध्याः । उच्चावचैः उदक् च अवाक् च उच्चावचं, तैः अनेकैः । कदर्थयन्तः पीडयन्तः तिरस्कुर्वन्तो वा । 'निन्दयन्तः' इति पदचन्द्रिका । प्रेत्य मृत्योरनन्तरम् । लभ्यैः प्राप्तुं योग्यैः । अभ्युदयातिशयैः लोकोत्तरसमृद्धिभिः । अजिनेन मृगचर्मणा । यज्ञकर्मणि अजिनधारणमनिवार्यम् । कर्मभेदेन चर्मधारणविधानमपि भेदं सहते । यथोपनयने 'ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य । रौरवं राजन्यस्य । आजं गव्यं वा वैश्यस्य" इति पारस्करः । शिरोमुण्डनादि सर्वमत्र वर्णितं कर्म दीक्षासंस्कारं निर्दिशति । अनशनं निराहारम् । सर्वस्वं सर्वमर्थजातम् । पापण्डिनः दुष्टाः । 'असंबद्धवादिन' इति पदचन्द्रिका, 'सर्वतोपभ्रष्टाः सर्ववेषधराः' इति भूषणा । पुत्राः सूनवः दाराः पत्न्यः स्त्रियो वा शरीरं देहं जीवितं प्राणाः, तानि ।

---

*व्यज्ञपयत् ६. पाखण्डिनः

मोचयन्ति। यदि कश्चित् पटुजातीयो नास्यै मृगतृष्णिकायै हस्तगतं त्यक्तुमिच्छेत्, तमन्ये परिवार्याहुः—

[नयज्ञनिन्दा]

१०. 'एकामपि काकिणीं कार्षापणलक्षमापादयेम, शस्त्राहृते सर्वशत्रून् घातयेम, एकशरीरमात्रमपि[10] मर्त्यं चक्रवर्तिनं विदधीमहि, यद्यस्मदुद्दिष्टेन मार्गेणाचर्यते' इति। स पुनरिमान् प्रत्याह—'कोऽसौ मार्गः' इति।

सर्वस्वत्यागेनैव परमं पुण्यं भवतीति कथयित्वेति यावत्। पटुजातीयः तत्त्वज्ञसदृशः। जातीयर्-प्रत्ययः प्रकारवचने प्रयुज्यते। मृगतृष्णिकायै मृगमरीचिकायै, अलीकाशायै इति भावः। परिवार्य परिवेष्ट्य।

१०. एकामिति—काकिणी विंशतिः वराटकाः, ताम्। कार्षापणः मुद्राभेदविशेषः। 'कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः' इति मनुः। तेषां लक्षम्। आपादयेम विदधीमहि। शस्त्रादिति—शस्त्रास्त्रादिकम् अप्रयुज्य युद्धं विना राजनीतिप्रयोगेणैव शत्रून् नाशयितुं समर्था वयमिति भावः।

एकशरीरेति—एकशरीरमात्रम् एकाकिनम्। चक्रवर्तिनं मनुष्यसमूहवर्तिनम्। चक्रे भूमण्डले वा वर्तते प्राधान्येन चरतीति वा, सार्वभौमनृपमित्यर्थः। अस्मदुद्दिष्टेन अस्माभिरुपदिष्टेन नयमार्गेण। नयमार्गस्तु दण्डनीत्यामुपदिष्टः। तथा चाह कामन्दकः—

> 'आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ।
> अर्थानर्थौ तु वार्तायां दण्डनीतौ नयानयौ॥'

आचर्यते कर्म क्रियते व्यवहरतीति भावः।

---

१०. शरीरिणामपि

[दण्डनीत्यां दोषाः]

११. पुनरिमे ब्रुवते—'ननु चतस्रो राजविद्याः-त्रयी वार्ता ऽऽन्वीक्षिकी दण्डनीतिरिति । तासु तिस्रस्त्रयीवार्तान्वीक्षिक्यो महत्यो मन्दफलाश्च । तास्तावदासताम् । अधीष्व तावद्दण्डनीतिम् । इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता । सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा

---

११. पुनरिति—राजविद्याः राजभिरध्येतव्या विद्याः, मुख्या विद्या वा । त्रयी ऋक्सामयजुरथर्ववेदात्मिका वेदविद्या । वार्ता सम्पत्तिशास्त्रम्; केषांचन मतेन अर्थशास्त्रम्, परं न तत्समीचिनं प्रतिभाति, कौटिल्यमर्थशास्त्रमित्यादिप्रयोगेषु तत्पदं दण्डनीतिशास्त्रपर्यायरूपेण प्रयुक्तमस्ति । आन्वीक्षिकी तर्कशास्त्रम् । दण्डनीतिः अर्थशास्त्रम्, राजनीतिरित्यर्थः । मन्दफलाः मन्दं फलं यासां, ताः, फले मन्दाः वा, निष्फलाः इति भावः । आसतां दूरे तिष्ठन्तु । तासामध्ययनं परिहारं सहते । इयमिति—इयं दण्डनीतिविद्या । आचार्यश्चासौ विष्णुगुप्तः च; स च चाणक्यः कौटिल्यः, तेन । मौर्यार्थे मौर्यकुलोत्पन्नाय राज्ञे चन्द्रगुप्ताय । संक्षिप्ता समासतो वर्णिता ।

> "सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
> कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ॥
> सर्वशास्त्राण्यनुक्रम्य प्रयोगमुपलभ्य च ।
> कौटिल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः ॥" इति ॥

तथा च—"पृथिव्या लाभे पालने च यावन्ति अर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्य एकमिदं शास्त्रं कृतम् ।" इत्याह कौटिल्यः । स एव च ग्रन्थस्य विस्तारं षट्सहस्रश्लोकपरिमितं वर्णयति । तदेवात्र दण्डिनोक्तमस्ति । इयं दण्डनीतिः । कौटिल्यार्थशास्त्रमिति

इति । स 'तथा' इत्यधीते, शृणोति च । तत्रैव जरां गच्छति । तत्तु किल शास्त्रं शास्त्रान्तरानुवन्धि[11] । सर्वमेव वाङ्मयम-विदित्वा न तत्त्वतोऽविगंस्यते । भवतु कालेन वहुनाऽल्पेन वा तदर्थाधिगतिः ।

[राजनीतिज्ञदिनचर्यायाः कट्वालोचनम्]

१२. अधिगतशास्त्रेण चादावेव पुत्रदारमपि न विश्वास्यम् । आत्मकुक्षेरपि कृते तण्डुलैरियद्भिरियानोदनः संपद्यते । इयत

यावत् । अधीत्य पठित्वा । अनुष्ठीयमाना व्यवह्रियमाणा । उक्तमनुसृत्य इति यथोक्तम् । तादृशे कर्मणि कर्मणे वा क्षमा समर्था । कार्षापण-लक्षसाधनादिकर्माणि साधयितुं समर्था भवतीति भावः । तत्रैवेति— जरां वार्धक्यं गच्छति प्राप्नोति, वृद्धो भवति । शास्त्रान्तरानुवन्धि इतर-शास्त्रैः संयुक्तम् । वाङ्मयं साहित्यम्, सर्वाणि शास्त्राणीति तात्पर्यम् । तत्त्वतः सम्यक्प्रकारेण—याथातथ्येन । अधिगंस्यते अवबुद्धं भविष्यति इति भावः । कालेन इत्यत्र फलप्राप्तिद्योतका तृतीया । तदर्थाधिगतिः तस्य अर्थस्य उद्दिष्टस्य प्रयोजनस्य अधिगतिः प्राप्तिः, तज्ज्ञानप्राप्तिरित्यर्थः ।

१२. अधिगतेति—अधिगतं सुष्ठु अवबुद्धं शास्त्रं राजनीति-विद्या येन, तेन राज्ञा । पुत्राणां दाराणां च समाहारः । विश्वास्यं विश्वसनीयम् । कुक्षिः उदरम् । स्वबुभुक्षाशान्त्यै इति भावः । तण्डुलः निस्तुषं धान्यम्—

> "सस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते ।
> निस्तुषः तण्डुलः प्रोक्तः स्विन्नमन्नमुदाहृतम् ॥

पाकानन्तरं तण्डुलानामोदनसंज्ञा भवति । इयद्भिः इयत्परिमाणैः ।

---

११. सर्वशास्त्रानुवन्धि

ओदनस्य पाकायैतावदिन्धनं पर्याप्तमिति मानोन्मानपूर्वकं देयम्।

१३. उत्थितेन च राज्ञा क्षालिताक्षालिते मुखे मुष्टिमर्धमुष्टिं वाऽभ्यन्तरीकृत्य कृत्स्नमायव्ययजातमह्नः प्रथमेऽष्टमे[12] भागे श्रोतव्यम्। शृण्वत एवास्य द्विगुणमपहरन्ति तेऽध्यक्षधूर्ताः। चत्वारिंशतं चाणक्योपदिष्टानाहरणोपायान् सहस्रधाऽऽत्मबुद्ध्-यैव ते विकल्पयितारः। द्वितीयेऽन्योन्यं विवदमानानां प्रजानामा-

---

पाकाय पक्तये। इन्धनं काष्ठादिकम्। पर्याप्तम् उचितम्। मानं मापनम्। उन्मानं तोलनं, तत्पूर्वकम्।

१३. **उत्थितेति**—सुप्त्वा जागरितेन। क्षालितं धौतं वा अक्षालितमधौतं वेति क्षालिताक्षालितम्, तादृशे। अत्र नञ् ईषदर्थेऽपि स्यात्। क्षालिते ईषत्क्षालिते वा। 'मुष्ट्यर्धमुष्टी परिमाणविशेषौ' इति पदचन्द्रिका। 'जनपदायव्ययशोधको मुष्टिः, ग्रामस्य शोधकोऽर्धमुष्टिः' इति भूषणा। अत्र तु मुष्टौ (हस्ते) यावदन्नमायाति तावदेव अभ्यन्तरीकृत्य खादित्वा इति भावः प्रतिभाति। त्वराकारणात् प्रातराशेऽपि न सुखमिति यावत्। कृत्स्नेति—कृत्स्नं सर्वम्। आयव्ययजातं धनागमनिर्गमनविवरणम्। नयज्ञस्य दिनमष्टभागेषु विभक्तम्। तत्र प्रथमे भागे। शृण्वत आकर्णयतः राज्ञः। अनादरे षष्ठी। तस्य पश्यत एव। द्विगुणं यावत् राजकार्ये लगति ततो द्विगुणम्। अध्यक्षधूर्ताः अध्यक्षाः च ते धूर्ताः। अध्यक्षाः विभागानां प्रधानपुरुषाः। आहरणोपायान् ग्रहणप्रकारान्। विकल्पयितारः सम्पादयितारः। अन्योन्यं परस्परम्। विवदमानानां

---

१२ प्रथमेऽष्टमे वा

क्रोशाद्दह्यमानकर्णः कष्टं जीवति । तत्रापि प्राड्विवाकादयः स्वेच्छया जयपराजयौ विदधानाः[13] पापेनाकीर्त्या च भर्तारमात्मानं[14] चार्थैर्योजयन्ति । तृतीये स्नातुं भोक्तुं च[15] लभते । भुक्तस्य यावदन्धःपरिणामस्तावदस्य विषभयं न शाम्यत्येव । चतुर्थे हिरण्यप्रतिग्रहाय हस्तं प्रसारयन्नेवोत्तिष्ठति । पञ्चमे मन्त्रचिन्तया महान्तमायासमनुभवति । तत्रापि मन्त्रिणो मध्यस्था[16] इवान्योन्यं मिथः[17] संभूय, दोषगुणौ दूतचारवाक्यानि शक्याशक्यतां देशकालकार्यावस्थाश्च

विवादे पतितानाम् । आक्रोशात् निन्दागर्भपरुषभाषणात् । दह्यमानकर्णः कर्णज्वरं प्राप्नुवन् । प्राड्विवाकादयः धर्माध्यक्षादयः । स्वेच्छयेति—उत्कोचं गृहीत्वा नियमान् आत्मभावानुरूपं व्याख्याय सत्यासत्यपक्षयोः जयपराजयपरिवृत्तिं सम्पादयन्ति । ते राज्ञः प्रतिनिधयः, अतः एतत्कर्मजन्यं पापम् अपयशश्च राजानमेवाश्रयेते इति भावः । यावदिति—यावदन्धःपरिणामः यावत् जठरे स्थितस्य अन्धसः ओदनस्य भोजनस्य वा परिणामः पाकः जायते तावत् । विषभयं केनचिद् भोजने विषः दत्तः स्यादिति भीतिः । राज्ञः भक्षणात् पूर्वं तदर्थभोजनपरीक्षार्थं कौटिल्यादिभिः नियमाः प्रदत्ताः सन्ति । हिरण्यस्य विविधोपायैः आयातस्य सुवर्णस्य प्रतिग्रहाय आदानाय । हस्तं प्रसारयन् ग्रहणकर्म असमाप्य तन्मध्ये एव । मन्त्रचिन्ता मन्त्रिभिः सह रहस्यविचारणा, तया । आयासं क्लेशम् । तत्रापीति—मध्यस्थाः तटस्थाः, निष्पक्षाः । भूषणामतेन तु 'वकील' इति भाषापदवाच्याः मध्यस्थाः भवन्ति । उभयपक्षयोः सम्मतः विवादे अराजपुरुषः निर्णायक इति वा । सम्भूय मिलित्वा । दोषगुणौ दोषः च गुणश्च तौ । दूताः च चाराः च, तेषां वाक्यानि । चारः गुप्तचरः । शक्याशक्यताम् विपरिवर्तयन्तः अन्यथा वर्णयन्तः । स्वस्य परस्य

---

१३. विवादधनाः १४. आत्मनश्चा० १५. च न लभते
१६. मध्यस्थायिनः १७. 'मिथः' पदं नास्ति

स्वेच्छया विपरिवर्तयन्तः स्वपरमित्रमण्डलान्युपजीवन्ति ।
बाह्याभ्यन्तरांश्च कोपान् गूढमुत्पाद्य प्रकाशं प्रशमयन्त
इव स्वामिनमवशमवगृह्णन्ति । षष्ठे स्वैरविहारो मन्त्रो
वा सेव्यः । सो [१८] ऽस्यैतावान् स्वैरविहारकालो यस्य तिस्रस्त्रि-
पादोत्तरा नाडिकाः । सप्तमे चतुरङ्गबलप्रत्यवेक्षणप्रयासः ।
अष्टमेऽस्य सेनापतिसखस्य विक्रमचिताक्लेशः । पुनरुपास्यैव

मित्रस्य च मण्डलानि; आत्मपक्ष्यान् विपक्षान् मित्राणि चेति भावः ।
उपजीवन्ति आश्रयन्ति । बाह्याभ्यन्तरान् बाह्यान् शत्रुभ्यः संजातान्,
आभ्यन्तरान् प्रजादिभ्यः समुद्भूतान् स्वदेशगतान् । 'बाह्यान् प्रजाः,
आभ्यन्तरान् अमात्यादींश्च' इति बालबोधिनीव्याख्यानं चिन्त्यम् ।
गूढमिति—गूढं गुप्तरूपेण । उत्पाद्य जनयित्वा । श्रूयतेऽनुभूयते च कैश्चिद्
यदद्यापि कैश्चित् राजपुरुषैरेवमेव क्रियते । अत्र तथ्यपरिमाणं निर्धार्यमेव ।
प्रशमयन्तः दण्डादिप्रयोगेण शान्तिं नयन्तः । अवशं किमपि विधातुम्
असमर्थः इति हेतोः विवशम् । अवगृह्णन्ति अवरुन्धन्ति, बाधन्ते
तिरस्कुर्वन्ति वा । स्वैरविहारः स्वैरं यथेच्छं विहारः विहरणम्:, श्रमाद्य-
पनोदाय निश्चिन्तं प्रमदवनादिषु भ्रमणमिति भावः । मन्त्रः अमात्यादिभिः
विचारः । सेव्यः सेवनीयः । एतयोः स्थित्यनुसारम् एकस्यैव सेवनमभि-
प्रेतमस्ति । दह्यतां (पाभे०) नाशं यातु । त्रिपादोत्तराः त्रिपादधिकाः ।
तिस्रस्त्रिपादोत्तरा, ऊनपादाः चतस्रः इति भावः । नाडिकाः घटिकाः
(समयपरिमाणविशेषः) । सप्तम इति—चतुरङ्गबलं चतुर्भिः अङ्गैः
अश्वगजरथपदातिरूपैः युक्तं बलं सेना । तस्य प्रत्यवेक्षणस्य निरीक्षणस्य
प्रयासः प्रयत्नः कष्टं वा । सेनापतिः बलाध्यक्षः सखा सहायः सहचरः
वा यस्य, सः; सेनापतिना सहेति भावः । विक्रमस्य सेनायाः बलाबल-
शिक्षासन्नाहव्ययगुणदोषयानस्थित्यादीनां चिन्तायाः विमर्शस्य क्लेशः

---

१८. स दह्यतां स्वैर०

संध्यां, प्रथमे रात्रिभागे गूढपुरुषा द्रष्टव्याः। तन्मुखेन चातिनृशंसाः [19]शस्त्राग्निरसप्रणिधयोऽनुष्ठेयाः। द्वितीये भोजनानन्तरं श्रोत्रिय इव स्वाध्यायमारभेत†। तृतीये तूर्यघोषेण संविष्टश्चतुर्थपञ्चमौ शयीत किल। कथमिवास्याजस्रचिन्तायासविह्वलमनसो[20] वराकस्य निद्रासुखमुपनमेत्[21]। पुनः षष्ठे

आयासः। उपास्य सन्ध्यां सायंकाले ब्रह्मदेवयज्ञौ सम्पाद्य। गूढपुरुषाः गुप्तचराः। तन्मुखेन तेषां गुप्तचराणां मुखेन माध्यमेन। अतिनृशंसाः अतिक्रूराः घातुका वा। शस्त्राग्नीति—शस्त्रप्रणिधिः शस्त्रप्रयोक्ता, यः शस्त्रेण अनभिमतं जनं शत्रुं वा हन्यात्। अग्निप्रणिधिः अग्निदायकः, यः वह्निना परेषां गृहादिकं दहेत्। रसप्रणिधिः विषदायकः, यः भोजनादिषु विषं प्रदाय शत्रून् निवारयेत्। अनुष्ठेयाः नियोजनीयाः। श्रोत्रियः वेदविद्। तथा चोक्तमस्ति—

> "जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते।
> विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥"

विद्यापदेन अत्र वेदविद्याभीष्टा। स्वयमेव एकाकिना जनेन वेदादिशास्त्राणां नियमेन आत्मनः शुद्ध्यर्थं ज्ञानार्थं चाध्ययनं स्वाध्यायः। स मानवेनावश्यं कर्तव्यः। तूर्यघोषेण राज्ञः शयनसमयः संजातः इति सूचकेन वाद्यानां शब्देन। संविष्टः सुप्तः। चतुर्थपञ्चमौ भागौ। अत्र कालस्यात्यन्तसंयोगे द्वितीया। कथमिति—अजस्रं सततं या चिन्ता तस्याः आयासेन दुःखेन विह्वलं व्याकुलं मनः चित्तं यस्य, तस्य। वराकस्य दयनीयस्य। निद्रायाः सुखम्, सुखेन निद्रा इति भावः। उपनमेत् समीपम् आगच्छेत्। शास्त्रस्य दण्डनीत्यादिज्ञानस्य चिन्ता विचारः

---

१९. ०ग्निप्रणिधयः † आरभते २०. चिन्तायासैर्विह्वलमनसो वा कस्य
२१. उपनमेत

शास्त्रचिन्ताकार्यचिन्तारम्भः। सप्तमे तु मन्त्रग्रहो दूताभिप्रेषणानि च। दूताश्च नामोभयत्र प्रियाख्यानलब्धानर्थान् वीतशुल्कबाधवर्त्मनि[२२] वाणिज्यया वर्धयन्तः कार्यमविद्यमानमपि [२३]लेशेनोत्पाद्यानवरतं भ्रमन्ति। अष्टमे पुरोहितादयोऽभ्येत्यैनमाहुः-'अद्य दृष्टो दुःस्वप्नः। दुःस्था ग्रहाः। शकुनानि चाशुभानि।' शान्तयः क्रियन्ताम्। सर्वमस्तु सौवर्णमेव होमसाधनम्। एवं सति कर्म गुणवद् भवति। ब्रह्मकल्पा इमे ब्राह्मणाः। कृतमेभिः स्वस्त्ययनं

कार्यस्य कृतकर्त्तव्यादिकर्मणः चिन्ता, तयोः आरम्भः उपक्रमः। **सप्तम इति**—*मन्त्रग्रहः मन्त्रिणां परामर्शश्रवणम्।* *दूताभिप्रेषणानि* राज्यान्तरेषु अन्यत्र च दूतानां राजदूतानां सन्देशवाहकादीनां च अभिप्रेषणम्। उभयत्र आत्मपक्षे परपक्षे च। **प्रियेति**—प्रियं चाटः आख्यानं भाषणं, तैः लब्धान् प्राप्तान्। **वीतशुल्केति**—वीतः गतः शुल्कस्य बाधः यस्मिन्, तत्; तत् चाटः वर्त्म मार्गः च, तस्मिन्। शुल्कं वाणिज्यकर्मणि राजदेयः करः। राजप्रतिनिधित्वाद् दूतानां व्यवहाराः अद्यापि निःशुल्काः भवन्ति। वाणिज्यया वणिक्कर्मणा। लेशेन स्वल्पेनाप्यपदेशेन। दुःस्वप्नः दुष्टफलप्रदः स्वप्नः। दुःस्थाः क्रूरस्थानेषु नीचस्वभावं प्राप्य वर्तमानाः। ग्रहाः सूर्यचन्द्रबुधगुरुशुक्रशनैश्चरराहुकेतुनामानः नव संख्याकाः शुभाशुभफलप्रदाः मनुष्यस्यायतिशासकाः नक्षत्रविशेषाः। एतेषां स्थित्यनुसारं मनुष्यः शुभाशुभगतिं प्राप्नोति। फलितज्योतिषे ग्रहाणां फलस्य विचारः दृश्यते। तदनुसृत्यैवैते पुरोहितादयः कथयन्ति। शकुनानि शकुनशास्त्रे विशदीकृतानि। शान्तयः ग्रहादीनां दोषाणां जपदानादिभिः दूरीकरणम्। अस्मिन् शान्तिकर्मणि सुवर्णस्य महान् योगः इति श्रूयते। अतएव शान्तिकर्मणि क्रियमाणस्य होमस्य साधनं पात्रादिकं सौवर्णं सुवर्णनिर्मितं यदि स्यात्

---

२२. वीतशुल्कनिराबाधम् २३. क्लेशेन

कल्याणतार भवति । ते चामी कष्टदारिद्र्या बह्वपत्या यज्वानो वीर्यवन्तश्चाद्याप्यप्राप्तप्रतिग्रहाः । दत्तं चैभ्यः स्वर्ग्यमायुष्यमरिष्टनाशनं च भवति' इति बहु बहु दापयित्वा तन्मुखेन स्वयमुपांशु भक्षयन्ति । तदेवमहर्निशमविहित[24] सुखलेशमायासबहुलमविरलकदर्थनं च नयतो नयज्ञस्यास्तां चक्रवर्तिता,

---

तर्हि ग्रहदोषः शाम्येत् । गुणवत् महाफलप्रदम् । ब्रह्मकल्पाः ब्रह्मणः ईषन्न्यूनाः, ब्रह्मसदृशा इत्यर्थः । कृतं सम्पादितम् । स्वस्त्ययनं क्षेमप्रापणं, मंगलकर्म इति यावत् । अस्मिन् कर्मणि स्वस्तिवाचकाः मन्त्राः प्रयुज्यन्ते । कष्टदारिद्र्याः कष्टं दुःखकरं दारिद्र्यं निर्धनता येषां ते, अकिंचनाः इत्याशयः । बह्वपत्याः बहूनि अपत्यानि सन्तानाः येषां, ते । यज्वानः प्रत्यहं याजकाः । वीर्यवन्तः यज्ञादिधर्मकर्मपरायणत्वात् शक्तिमन्तः, तेजस्विनः; देवताः प्रभावयितुं समर्थाः इति भावः । न प्राप्तः लब्धः प्रतिग्रहः दानं यैः, ते । स्वर्ग्येति—स्वर्ग्यं स्वर्गप्रापकम् । आयुष्यम् आयुषो जीवितस्य वृद्धिकरं विस्तारयितृ । अरिष्टस्य अशुभस्य नाशनं शमनम्—अशुभस्थितिनिवारकम् । बहु बहु बहुवारं पुष्कलमिति वा । तन्मुखेन तस्य माध्यमेन । उपांशु गुप्तरूपेण । 'एकान्ते' इति पदचन्द्रिका । तदेवमिति—अहर्निशं रात्रिंदिवम् । न विहितः कल्पितः सुखस्य लेशः अंशः अपि यस्मिन् कर्मणि तद्यथा स्यात् तथा; सुखविधानहीनमित्यर्थः । आयासः परिश्रमः कष्टं वा बहुलः अत्यधिकः यस्मिन् कर्मणि तद्यथा स्यात् तथा । अविरलं निरन्तरं कदर्थनं तिरस्कारः यस्मिन् कर्मणि तद्यथा स्यात् तथा । नयतः जीवनं यापयतः । आस्ताम् दूरे स्यात् । चक्रवर्तिता चक्रवर्तिनः सार्वभौमस्य भावः । स्वस्य आत्मनः

२४, अविदित

स्वमण्डलमात्रमपि दुरारक्ष्यं[२५] भवेत् । शास्त्रज्ञसमाज्ञातो[२६] हि यद् ददाति, यन्मानयति, यत्प्रियं ब्रवीति, तत्सर्वमतिसन्धातु[२७]मित्यविश्वासः । अविश्वास्यता हि जन्मभूमिरलक्ष्म्याः । यावता च नयेन विना [२८]याति लोकयात्रा स लोकत[२९] एव सिद्धः । नात्र शास्त्रैरणार्थः । स्तनंधयोऽपि[३०] हि तैस्तैरुपायैः स्तनपानं जनन्या लिप्सते । तदपास्यातियन्त्रणामनुभूयन्तां यथेष्टमिन्द्रियसुखानि ।

मण्डलं राज्यम् । दुरारक्ष्यं दुःखेन परिपाल्यम् । शास्त्रज्ञेन दण्डनीतिविशारदेन समाज्ञातः आदिष्टः—उपदिष्टः । बालबोधिन्यां तु 'समज्ञातः' पाठो वर्तते, तथैव च व्याख्यानम्—"नीतिशास्त्रज्ञोऽयमिति या समज्ञा कीर्तिस्तया इति पञ्चम्यास्तसिल्" । मानयति मानं करोति—सत्करोति । अतिसन्धातुं वञ्चयितुम् । अविश्वास्यता विश्वासस्य श्रद्धायाः अभावः । जन्मभूमिः उत्पत्तिस्थानं—कारणम् । अलक्ष्म्याः राजश्रियः अभावस्य नाशस्य वा । **यावतेति**—यावता ज्ञानेन । इदं पदं 'नयेन'—इत्यस्य पदस्य विशेषणं नाभिप्रेतम् । नयेन विना राजनीतिं परित्यज्य । लोकयात्रा लोकव्यवहारः । स लोकव्यवहाराय अलं ज्ञानम् । अर्थः प्रयोजनम् । **स्तनेति**—स्तनौ धयति पिबति इति स्तनंधयः शिशुः । तैस्तैः विविधैरित्यर्थः । लिप्सते प्राप्तुमिच्छति । तद् तस्मात्—इति हेतोः । अपास्य परिहृत्य । अतियन्त्रणां महान्तमायासम् । यथेष्टं स्वैरं यथाकामम् । इन्द्रियसुखानि इन्द्रियेभ्यः जातानि सुखानि ।

---

२५. दुरारक्षम्; दुरारक्ष्यः २६. समज्ञातः २७. अधिसंधातुम्

२८. न याति लोक०; न विना नयेन; समयेन विना लोकयात्रा

२९. लोके ३०. ननु बालिशोऽपि

[दण्डनीतेर्वैयर्थ्यम्]

१४. येऽप्युपदिशन्ति—'एवमिन्द्रियाणि जेतव्यानि, एवमरि-षड्वर्गस्त्याज्यः, सामादिरुपायवर्गः स्वेषु परेषु चाजस्रं प्रयोज्यः, सन्धिविग्रहचिन्तयैव नेयः कालः, स्वल्पोपि सुखस्यावकाशो न देयः' इति, तैरप्येभिर्मन्त्रिवकैर्युष्मत्तश्चौर्यार्जितं धनं दासीगृहेष्वेव भुज्यते। के चैते वराकाः। येऽपि [31] मन्त्रकर्कशाः शास्त्रतन्त्र-

---

१४. येऽपीति—इन्द्रियाणि उभयविधानि हस्तपादवाग्गुदोपस्थ-रूपाणि कर्मेन्द्रियाणि, नेत्रश्रोत्रनासिकाजिह्वात्वचः ज्ञानेन्द्रियाणि, मनः उभयमिन्द्रियम् । जेतव्यानि वशे करणीयानि । **अरिषड्वर्गेति**—कामक्रोधलोभमदमोहमात्सर्याणि षड् अरयः शत्रवः उच्यन्ते । तेषां वर्गः समूहः । सामादयः सामदानभेददण्डा उपायाः साधनानि, तेषां वर्गः समुदायः । स्वेषु आत्मीयेषु जनेषु परेषु शत्रुजनेषु । अजस्रं सन्ततम् । सन्धिः अन्यैः राष्ट्रैः सह मैत्रीस्थापनं, युद्धविरामः व्यापारादि-योजना । विग्रहः युद्धकर्म । तयोः चिन्ता विचारः, तया । अवकाशः अवसरः । **स्वल्पेति**—नयज्ञः क्षणमात्रमपि सुखं न वसेद् इति भावः । मन्त्रिवकैः मन्त्रिणः वका इव, तैः धूर्तैः मन्त्रिभिः । अथवा, मन्त्रिणश्च ते वकाश्चेति, मन्त्रिकुत्सितैः । तथा चाह मनुः—

"अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च वकव्रतचरो द्विजः ।"

चौर्येण स्तैन्यकर्मणा अर्जितं सम्पादितम् । दासीगृहेषु वेशवासेषु वा परस्त्रीसन्निधौ वा सेविकावासेषु वा । **येऽपीति**—मन्त्रकर्कशाः मन्त्रेषु उपदेशेषु कर्कशाः कठोराः कठिनाः वा; ये क्रूरं पीड़ाकरं व्यवहाररीतिं विदधति, ते । शास्त्रतन्त्रकाराः अर्थशास्त्रसिद्धान्तप्रतिपादकाः ।

---

३१. मतिकर्कशाः ।

कारा:[३२] शुक्राङ्गिरसविशालाक्ष[३३] वाहुदन्तिपुत्रपराशरप्रभृतय-स्तैः किमरिषड्वर्गो जितः, कृतं वा तैः शास्त्रानुष्ठानम् । तैरपि हि प्रारब्धेषु कार्येषु दृष्टे सिद्धयसिद्धी । पठन्तश्चापठद्भिरतिसंधीयमाना वहवः । नन्विदमुपपन्नं देवस्य यदुत सर्वलोकस्य वन्द्या जातिरयातयामं वयो दर्शनीयं वपुरपरिमाणा विभूतिः । तत्सर्वं सर्वाविश्वासहेतुना सुखोपभोगप्रतिबंधिना वहुमार्गविकल्पनात् सर्वकार्येष्वमुक्तसंशयेन तन्त्रावापेनैव[३४] मा कृथा वृथा । सन्ति

"तन्त्रकर्तारः कर्मकर्त्तारः' इति पदचन्द्रिका । शुक्रेति—शुक्रादयोऽत्र राजनीतिशास्त्राचार्याः सन्ति यैः दण्डनीतिग्रन्था रचिताः । शास्त्रानुष्ठानं राजनीतिशास्त्रस्य प्रयोगः । सिद्धिः साफल्यम् । असिद्धिः वैफल्यम् । पठन्तः अर्थशास्त्रस्याध्येतारः । अपठद्भिः दण्डनीतेरनभिज्ञैः । अतिसन्धीयमाना वञ्च्यमानाः । नन्विति—उपपन्नं युक्तम् । वन्द्या अभिवाद्या । जातिः जन्म वंशो वा । अयातयामं न यातः समाप्तः यामः प्रहरः—उपभोगकालः यस्य तत्; नवमिति यावत् । वयः आयुः—अवस्था । दर्शनीयं सुन्दरम् । वपुः शरीरं रूपं वा । अपरिमाणा विपुला । विभूतिः धनसम्पदादयः । सर्वाविश्वासेति—सर्वेषु अविश्वासस्य हेतुः कारणं, तेन , सुखानाम् इन्द्रियसुखानाम् उपभोगे आस्वादने प्रतिवन्धिना विघ्नकारिणा । वहुमार्गविकल्पनात् वहवः नाना मार्गाः अध्वानः, तेषां विकल्पनात् विमर्शात्—विधानात् । अमुक्तः सर्वदा हृदि स्थापितः संशयः येन सः, तथाविधेन । तन्त्रेति—'तन्त्रं स्वराष्ट्रचिन्ता स्यादावापस्त्वरिचिन्तनम्' इति । 'तन्त्रावापो नीतिविचारः' इति भूषणा । सर्वं दण्डनीतिशास्त्रमत्र तन्त्रावापपदेन निर्दिष्टमस्ति । दन्तिनां गजानाम् । हयानामश्वानाम् । पादातं पदातीनां

---

३२. 'शास्त्र' इति नास्ति । ३३. विशालच्यवनपुत्र

३४. तन्त्रावापेन ।

हि ते दन्तिनां दश सहस्राणि हयानां लक्षत्रयमनन्तं च पादातम् । अपि च पूर्णान्येव हेमरत्नैः कोशगृहाणि । सर्वश्चैष जीवलोकः समग्रमपि युगसहस्रं भुञ्जानो न ते कोष्ठागाराणि रेचयिष्यति । किमिदमपर्याप्तं यदन्यार्जितायायासः क्रियते । जीवितं हि नाम

समूहः । हेम सुवर्णं च रत्नानि मणयः च, तैः । कोशगृहाणि धनागाराणि । जीवलोकः प्राणिसमूहः । **समग्रेति**—समग्रमिति युगसहस्रमित्यस्य विशेषणम् । युगानां सहस्रम् । युगं कालपरिमाणविशेषः । युगसहस्रस्य परिमाणं मनुनैवं विहितमस्ति—

"चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम् ।
तस्य तावच्छती संध्या संध्यांशश्च यथाविधः ॥
इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु ।
एकापायेन वर्तन्ते सहस्राणि शतानि च ॥
यदेतत्परिसंख्यातमादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥
दैविकानां युगानां तु सहस्रं परिसंख्यया ।
ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रिमेव च ॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः ।
रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः ॥"

ब्राह्मदिने सृष्टिः चलति । अतः युगसहस्रस्याभिप्रायः प्रलयकालं यावत् प्रतिभाति । भुञ्जानः भक्षयन् । कोष्ठागाराणि धान्यसंचयगृहाणि । रेचयिष्यति रिक्तानि करिष्यति समाप्स्यति । इदम् एतावत् युगसहस्रपर्यन्तस्थायि धनम् । अपर्याप्तम् अल्पं-कार्यसाधनाय नालम् । अन्यार्जिताय अन्यैः उपायैः अर्जिताय प्राप्ताय । अथवा अन्यैः जनैः आत्मनः कृते अर्जिताय प्राप्ताय, परकीयधनाय इति भावः । अथवा-अन्यत् च तत् अर्जितं च अन्यार्जितम्; तथाविधाय धनाय इत्याशयः ।

जन्मवतां चतुःपञ्चाप्यहानि । तत्रापि भोगयोग्यमल्पाल्पं वयः-खण्डम् । अपण्डिताः पुनरर्जयन्त एव ध्वंसन्ते । नार्जितस्य वस्तुनो लवमप्यास्वादयितुमीहन्ते ।

[विहारभद्रोपदेशस्योपसंहारः]

१५. किं बहुना । राज्यभारं भारक्षमेष्वन्तरङ्गेषु[३५] भक्ति-मत्सु समर्प्य, अप्सरःप्रतिरूपाभिरन्तःपुरिकाभी रममाणो गीत-संगीतपानगोष्ठीश्च यथर्तु बध्नन् यथार्हं[३६] "कुरु शरीरलाभम्" इति पञ्चाङ्ग[३७]स्पृष्ट[३८]भूमिरञ्जलिचुम्बितचूडश्चिरमशेत।प्राहसीच्च

आयासः प्रयत्नः । जन्मवतां प्राणिनाम् । चतुःपञ्चाप्यहानि अल्पकाल-स्थायि इति भावः । भोगेभ्यः योग्यम् उपयुक्तम्, यतो यौवनकाल एव भोगा भुज्यन्ते । अल्पाल्पम् अत्यल्पम् । वयःखण्डम् आयुषो भागः । अपण्डिताः मूर्खाः, अविवेकिनः नयज्ञाः । अर्जयन्तः धनमाहरन्तः । ध्वंसन्ते नाशं यान्ति । लवमपि लेशमपि । आस्वादयितुम् उपभोक्तुम् ।

१५. किं बहुनेति—राज्यभारं शासनकार्यम् । भारक्षमेषु राज्यभारधारणसमर्थेषु; योग्येषु अधिकारिष्वित्यर्थः । अन्तरङ्गेषु विश्वस्तेषु भक्तिमत्सु भवदनुरक्तेषु । अप्सरसां देवस्त्रीणां प्रतिरूपाभिः सदृशाभिः । अन्तःपुरिकाभिः अन्तःपुरे वर्तमानाभिः स्त्रीभिः । रममाणः सुखमुपभुञ्जानः । पानं सुरापानम्, तस्य गोष्ठीः सदांसि । यथर्तु ऋतोरनु-रूपम् । बध्नन् विदधत् । यथार्हम् अर्हमनतिक्रम्य, अथवा अर्हस्य अनुरूपम् । शरीरस्य देहस्य लाभः उपयोगः, तम् । पञ्चाङ्गेति—पञ्चानाम् । अंगानां समाहारः: इति पञ्चाङ्गी–द्वे जानुनी, द्वौ बाहू मूर्धा चेति पञ्चभिरङ्गैः (पञ्चाङ्गीति पाठभेदे पञ्चाङ्ग्या) स्पृष्टा भूमिः येन सः । अञ्जलिना बद्धाभ्यां कराभ्यां चुम्बिता स्पृष्टा चूडा

---

३५. अन्तरङ्गभूतेषु ३६. यथार्थम् ३७. पञ्चाङ्गी ३८. मृष्टा

[39]प्रतिफुल्ललोचनोऽन्तःपुरप्रमदाजनः। जननाथश्च सस्मितम् 'उत्तिष्ठ[40]। ननु हितोपदेशाद् गुरवो भवन्तः। किमिति गुरुत्व-विपरीतमनुष्ठितम्' इति तमुत्थाप्य क्रीडानिर्भरमतिष्ठत्[41]।

[मन्त्रिणो वसुरक्षितस्य वितर्कः]

१६. अथैषु दिनेषु भूयोभूयः प्रस्तुतेऽर्थे प्रेर्यमाणो मन्त्रिवृद्धेन वचसाभ्युपेत्य मनसैवाचित्तज्ञ इत्यवज्ञातवान्। अथैवं मन्त्रिणो मनस्यभूत्—"अहो मे मोहाद् बालिश्यम्। [42]अरुचितेऽर्थे

मालिः येन सः, बद्धाञ्जलिरित्याशयः। प्रतिफुल्लेति—प्रतिफुल्ले विकसिते लोचने नेत्रे यस्य सः हर्षविकसितनयनः। अन्तःपुरे अवरोधे वर्तमानाः प्रमदाः युवतयः च ताः जनाः च। जनानां नाथः,नृपः। हितोपदेशाद् हिताय कल्याणाय उपदेशः शिक्षणं, तस्मात्। गुरवः अज्ञानान्धकारनाशकाः। गुरुत्वस्य शिक्षकत्वस्य विपरीतं विरुद्धम्। क्रीडानिर्भरम् क्रीडासु निर्भरः मग्नः यथा स्यात् तथा।

१६. अथैष्विति—एषु दिवसेषु येषु अनन्तवर्मा क्रीडानिर्भरो जातः। भूयोभूयः पुनः पुनः। प्रस्तुते प्रकृते करणीये वा। अर्थे कर्मणि। प्रेर्यमाणः चोद्यमानः। अभ्युपेत्य अङ्गीकृत्य। अचित्तज्ञः राज्ञः मम चित्तस्य मनसः प्रवृत्तिं न जानाति इति। अवज्ञातवान् अवधीरितवान्। अहो म इति—मोहात् पुण्यवर्मणः सम्बन्धात् अनन्तवर्मणि नयादिमुपेक्ष्य प्रेमातिशयकारणात्। बालिश्यं मौर्ख्यम्। अरुचिते अनभिमते। अर्थी

---

३९. प्रीतिफुल्ल०	४०. उत्तिष्ठत

४१. क्रीडारसनिर्भरमतिः	४२. अनुचिते

चोदयन्नर्थीवाक्षिगतोऽहमस्य हास्यो जातः । स्पष्टमस्य चेष्टाना-§मयथापूर्व्यम् । तथाहि । न मां स्निग्धं पश्यति, न स्मितपूर्वं भाषते, न रहस्यानि विवृणोति, न हस्ते स्पृशति, न व्यसनेष्वनुकम्पते, नोत्सवेष्वनुगृह्णाति, न विलोभनवस्तूनि[४३] प्रेषयति, न मत्सुकृतानि प्रगणयति, न मे गृहवार्तां पृच्छति, न मत्पक्ष्यान्[४४] प्रत्यवेक्षते, न मामासन्नकार्येष्वभ्यन्तरीकरोति, न मामन्तःपुरं प्रवेशयति । अपि च–मामनर्हेषु कर्मसु नियुङ्क्ते, मदासनमन्यैरवष्टभ्यमानम-

---

याचकः । अक्षिगतः रजआदिवत् अक्षिणि नेत्रे गतः पतितः, बहिर्निष्कास्यः द्वेष्यः पीडाकरः च इति भावः । हास्यः उपहासभाजनम् । चेष्टानां व्यवहाराणाम् । अयथेति—पूर्वस्य भावः पूर्व्यम्, तद् अनतिक्रम्य इति यथापूर्व्यं, न यथापूर्व्यम् अयथापूर्व्यम्; विलक्षणत्वं–विचित्रत्वम्; पूर्वतो वैपरीत्यम् इति भावः । स्निग्धं सस्नेहम् । स्मितपूर्वं सस्मितं, प्रसन्नं वा । रहस्यानि गुप्तवार्ताः । विवृणोति प्रकटयति । व्यसनेषु विपत्तिषु । अनुकम्पते सहानुभूतिं दर्शयति उत्सवेषु आनन्दावसरेषु । अनुगृह्णाति कृपां प्रदर्श्य आह्वयति । विलोभनवस्तूनि पारितोषिकवस्तूनि । 'आदरणीयवस्तूनि' इति लघुदीपिका । प्रजादिभ्यः उपायनेषु प्राप्तेषु वस्तुषु भागः, तम् इत्यर्थः । प्रगणयति मानयति गृहवार्तां गेहे वर्तमानां स्थितिम् । मत्पक्ष्यान् मम पक्षपातिनः । प्रत्यवेक्षते सानुग्रहं पश्यति । आसन्नकार्येषु परमावश्यकेषु सद्यः कर्तव्येषु कर्मसु रहस्यकर्मसु वा । अभ्यन्तरीकरोति विश्वासस्थानं करोति । अपि चेति—अनर्हेषु अयोग्येषु, मत्स्थानासदृशेषु साधारणेषु इति भावः । नियुङ्क्ते व्यापृतं करोति । अवष्टभ्यमानम् आक्रम्यमाणम् । अनुजानाति अनुमोदते सहते उपेक्षते वा । राजसभायां यस्य यदासनं तत्र स एव तिष्ठति नान्यः, विशेषतः मन्त्रि-

---

§ ०मायथा०　　४३. वस्तु　　४४. मत्पक्षान्

नुजानाति, मद्वैरिषु विश्रम्भं दर्शयति मदुक्तस्योत्तरं न ददाति, मत्समानदोषान् विगर्हयति, मर्मणि मामुपहसति, स्वमतमपि मया वर्ण्यमानं प्रतिक्षिपति, महार्हाणि वस्तूनि मत्प्रहितानि नाभिनन्दति, नयज्ञानां स्खलितानि मत्समक्षं मूर्खैरुद्घोषयति । सत्यमाह चाणक्यः—'चित्तज्ञानानुवर्तिनोऽनर्थ्या[४५] अपि प्रियाः स्युः । दक्षिणा अपि तद्भाव-

---

मुख्यानामासनेषु । अस्मिन् विपर्ययं कुर्वाणो जनः दण्ड्यो भवति, परमयं राजा ममासनमधितिष्ठन्तं कमपि न दण्डयति । अन्यान् तत्र स्थातुं प्रेरयति च । मद्वैरिषु च मम विरोधिषु शत्रुषु वा । विश्रम्भं विश्वासम् । दर्शयति प्रकटयति स्थापयति वा । मदुक्तस्य मया पृष्टस्य प्रश्नादिवचसः । मत्समानेति—मम समानः दोषः येषां, तान्; अथवा—मम समानः मत्समानः, तेषां दोषान् । नयज्ञानां दोषानिति भावः । विगर्हयति निन्दति, निन्दयति वा । मर्मणि मर्मसु पीडाकरम्-अरुंतुदम् । प्रतिक्षिपति तिरस्करोति । महार्हाणि बहुमूल्यानि । मत्प्रहितानि मया प्रेषितानि । अभिनन्दति सहर्षं स्वीकरोति । नयज्ञानां राजनीतिशास्त्रविशारदानाम् स्खलितानि प्रमादस्थानानि । मत्समक्षं मम पुरतः । मूर्खैः नयज्ञानहीनैः विवेकबुद्ध्यादिरहितैः मूढैः । उद्घोषयति प्रकाशयति । चित्तेति—चित्तस्य मनसः ज्ञानं भावं विज्ञाय अनुवर्तिनः व्यवहारं कुर्वन्तः—मनोनुकूलमाचरन्त इति निर्गलितार्थः । अनर्थ्याः न अर्थितुं योग्याः, अनिष्टाः इति यावत् । दक्षिणाः विज्ञाः भक्तिमन्तः जनाः । 'सरला' इति पदचन्द्रिका । तद्भावेति—तस्य भावः मनसः वृत्तिः, तस्माद् बहिष्कृताः बाह्याः, तन्मनोविपरीतमाचरन्तः इति तात्पर्यम् । द्वेष्याः

---

४५. अनर्थाः

बहिष्कृता द्वेष्या भवेयुः' इति । तथापि का गतिः । अविनीतोऽपि न परित्याज्यः [४६]पितृपैतामहैरस्मादृशै[४७]रयमधिपतिः । अपरित्यजन्तोऽपि कमुपकारमश्रूयमाणवाचः कुर्मः । सर्वथा नयज्ञस्य वसन्तभानोरश्मकेन्द्रस्य हस्ते राज्यमिदं पतितम् । अपि नामापदो भाविन्यः प्रकृतिस्थमेनमापादयेयुः । अनर्थेषु सुलभव्यलीकेषु[४८] क्वचिदुत्पन्नोऽपि द्वेषः सद्वृत्तमस्मै न रोचयेत् । भवतु । भविता तावदनर्थः । स्तम्भितपिशुनजिह्वो यथाकथंचिदभ्रष्टपदस्तिष्ठेयम्' इति ।

त्याज्याः; वैरिणः इति वा । गतिः निष्क्रमणोपायः । **अविनीतेति**—अविनीतः अत्युद्धतः—असद्व्यवहारपरायणः । परित्याज्यः परित्यक्तुं हातुं योग्यः । पितुः पितामहाद् आगतैः, पितुः पितामहस्य तुल्यैर्वा । न श्रूयमाणा आकर्ण्यमाना वाक् भाषणं येषां ते । अश्मकेन्द्रस्य अश्मक-देशाधिपतेः । भाविन्यः आगामिन्यः; आगत्य इत्याशयः । प्रकृतिस्थं स्वस्थं विवेकयुक्तं नीतिमार्गानुसारिणं मद्वचनानुवर्तिनम् । आपादयेयुः कुर्युः । अनर्थेषु कष्टेषु । **सुलभेति**—सुलभं सुकरं व्यलीकं पीडा येषु, तेषु । क्वचित् यत्र-कुत्रचित् । उत्पन्नः संजातः । द्वेषः वैरम्; इदं पदं 'रोचयेत्' क्रियायाः कर्तृ । सद्वृत्तं दण्डनीत्यनुकूलं युक्तं व्यवहारम् । रोचयेत् रुचिकरं कुर्यात् । भविता भावी भविष्यति । अनर्थः कष्टं—विपत्तिः । **स्तम्भितेति**—स्तम्भिता वशं नीता पिशुनस्य सूचकस्य जिह्वा येन सः । अयं भावः अन्येषां विषये किमपि न कथयिष्यामि । मौनं धारयिष्यामि । ते किमपि कुर्युः, किमपि न कथयिष्यामि । मौनं धारयिष्यामि, ते किमपि कथयेयुरिति । यथाकथंचिद् येन केनापि प्रकारेण । **अभ्रष्टेति**—अभ्रष्टम् अच्युतं हस्तगतम् अधिगतं वा पदम् अधिकार-

---

४६. पितृपितामहानुयातैः राजकुलमीदृशश्चायमधिपतिः

४७. अस्माकमुपसेवितमिदं

४८. सुलभालीकेषु

[चन्द्रपालितस्यागमनम्]

१७. एवंगते मन्त्रिणि राजनि च कामवृत्ते चन्द्रपालितो नामाश्मकेन्द्रामात्यस्येन्द्रपालितस्य सूनुरसद्वृत्तः पितृनिर्वासितो नाम भूत्वा वहुभिश्चारणगणैर्वह्वीभिरनल्पकौशलाभिः शिल्पकारिणीभिरनेकच्छन्नकिंकरैश्च गूढपुरुषैः परिवृतोऽभ्येत्य विविधाभिः क्रीडाभिर्विहारभद्रमात्मसादकरोत्। अमुना चैव संक्रमेण राजन्यास्पदमलभत। लब्धरन्ध्रश्च स यद् यद् व्यसनमारभते तत् तथेत्यवर्णयत्—

स्थानं यस्य सः, पदस्थ इति भावः। तिष्ठेयं वर्तमानः स्याम्।

१७. एवं गत इति—एवं गते इमाम् अवस्थां प्राप्ते; राज्ञा अवधीरिते, मुद्रितजिह्वे तिष्ठति। कामवृत्ते कामे वृत्तः सक्तः परायणो वा, तस्मिन्। असद्वृत्तः असद् अनुचितं यथा स्यात् तथा वृत्तः व्यापृतः; दुराचारपरायण इत्यर्थः। पित्रा जनकेन निर्वासितः गृहाद् निष्कासितः। चारणगणैः गायकसमूहैः। अनल्पं पर्याप्तं कौशलं प्रावीण्यं यासां ताभिः, परमकुशलाभिरित्यर्थः। शिल्पकारिणीभिः शिल्पं चित्रादिकं तत्कर्तुं शीलम् आसां, ताभिः शिल्पिनीभिः। **अनेकेति**—अनेके वहवः छन्नाः गुप्ताः किंकराः, दासाः, तैः। गूढाः पुरुषाः, गुप्तचरा इति यावत्। तैः। आत्मसात् आत्मपक्षे वशीभूतं वा। अमुना तेन। संक्रमेण सहगमनेन सेतुना वा; 'सम्मेलनेन' इति वालवोधिनी; सेतुरूपेण तेन विहारभद्रेण सह गमनेन शनैः शनैः इति भावः। राजनि अनन्तवर्महृदि आस्पदं स्थानम् अलभत प्राप्नोत; राज्ञः मनसि अपि प्रतिष्ठापात्रतां गतः इति भावः। **लब्धेति**—लब्धं प्राप्तं रन्ध्रं दुर्वलस्थानं येन सः। व्यसनं 'स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यार्थदूषणे। दण्डपारुष्यमित्येतन्महाव्यसनसप्तकम्' इति वैजयन्ती। तत् व्यसनम्। तथा, प्रशंसनीयं कर्म इति। अवर्णयत् ख्यापितवान्।

[चन्द्रपालितेन कृता व्यसनानां प्रशंसा—मृगया]

१८. 'देव, यथा मृगया ह्यौपकारिणी[४६] न तथान्यत् । अत्र हि व्यायामोत्कर्षादापत्सूपकर्ता दीर्घाध्वलङ्घनक्षमो जङ्घाजवः, कफापचयादारोग्यैकमूलमाशयाग्निदीप्तिः,मेदोपकर्षादङ्गानां स्थैर्यकार्कश्यातिलाघवादीनि, शीतोष्णवातवर्षक्षुत्पिपासासहत्वं, सत्त्वानामवस्थान्तरेषु चित्तचेष्टितज्ञानं, हरिणगवलगवयादिवधेन सस्यलोपप्रतिक्रिया, वृकव्याघ्रादिघातेन स्थलपथशल्यशोधनं, शैलाटवीप्रदेशानां

---

१८. देवेति—इतः परं चन्द्रपालितस्य व्यसनप्रशंसा निरूप्यते । मृगया आखेटः । औपकारिणी लाभप्रदा । व्यायामस्य परिश्रमस्य उत्कर्षाद् आधिक्यात् । दीर्घः विस्तृतः अध्वा मार्गः, तस्य लङ्घने क्रमणे क्षमः समर्थः । जङ्घयोः जवः वेगः, शक्तिरिति भावः । कफेति—कफस्य श्लेष्मणः अपचयात् नाशात् । आरोग्यस्य स्वास्थ्यस्य एकमेव मूलं कारणम् । आशयस्य आमाशयस्य—जठरस्य अग्नेः अनलस्य दीप्तिः वर्धनम् । मेदसः भाषायां 'चर्बी' इति ख्यातस्य शरीरस्थधातुविशेषस्य अपकर्षात् क्षयात् । अंगानां हस्तपादादीनाम् । स्थैर्यं स्थिरता । कार्कश्यं काठिन्यम् । शीतेति—शीतादीनि सोढुं शक्तिः । सत्त्वानां प्राणिनाम् । अवस्थान्तरेषु विविधासु परिस्थितिषु । चित्तेति—चित्तस्य मनसः चेष्टितानां व्यापाराणां ज्ञानम् । गवलः वनमहिषः । गवयः गोसदृशः वन्यः पशुः । सस्यस्य कृषिफलस्य यः लोपः नाशः, तस्य प्रतिक्रिया निवारणोपायः । वृकः आरण्यः श्वा । व्याघ्रः शार्दूलः । तादृशानां हिंसकपशूनां घातेन वधेन । स्थलेति—स्थले भूम्यां पन्थाः

---

४६. ह्यौपकारिकी

विविधकर्मक्षमाणामालोचनम्, आटविकवर्गविश्रम्भणम्, उत्साहशक्तिसंधुक्षणेन प्रत्यनीकवित्रासनमिति बहुतमा गुणाः ।

[द्यूतम्]

१९. द्यूतेऽपि द्रव्यराशेस्तृणवत्त्यागादनुपमानमाशयौदार्यं, [५०]जयपराजयानवस्थानाद्धर्षविषादयोरविधेयत्वं, पौरुषैक-

---

मार्गः, तस्य शल्यानां कण्टकानां शोधनम् उद्धरणम् । शैलानि पर्वताः, अटव्यः वनानि च, तासां प्रदेशानां स्थलानाम् । आलोचनं निरीक्षणम् । आटविकाः वनेचराः, तेषां वर्गः समूहः, तेषु विश्रम्भणं विश्वासोत्पादनम् । उत्साहः साहसं पराक्रमो वा, तस्य शक्तेः सामर्थ्यस्य संधुक्षणेन वर्धनेन । प्रत्यनीकानां शत्रुसेनानां वित्रासनं भयोत्पादनम् । बहुतमाः अत्यधिकाः । कालिदासोऽपि मृगयायामेतान् गुणान् निर्दिशति—

"मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ॥"

१९. द्यूतेऽपीति—इदानीं द्यूतस्य गुणवत्ता प्रतिपाद्यते । द्यूते अक्षक्रीडायाम् । द्रव्यराशेः धनसम्पत्तेः तृणवत् अक्लेशेन हेलया वा । अनुपमानम् अतुलनीयमसाधारणं वा । आशयस्य मनसः औदार्यम् असंकीर्णता स्फीतिः वा । अनवस्थानात् अनिश्चयात् । द्यूते कदा जयः स्यात् कदा पराजयो वा इति निश्चयेन न ज्ञायते । पराजयात्परा-जयमनुभवन् अपि द्यूतकरः जयस्याशया हर्षशोकयोः हीनः प्रतिभाति । अत एवाह—हर्षः आनन्दः, विषादः दुःखं शोको वा, तयोः अविधेयत्वम् अनधीनत्वम्—अवशवर्तित्वम् । पौरुषस्य पुरुषोचितकर्मणः—पराक्रमस्य

---

५०. जयपराजयोरनवस्थानाद्

निमित्तस्यामर्षस्य वृद्धिः, अक्षहस्तभूम्यादिगोचराणामत्यन्तदुरुप-लक्ष्याणां कूटकर्मणामुपलक्षणादनन्तबुद्धिनैपुण्यम्, एकविषयोप-संहाराच्चित्तस्यातिचित्रमैकाग्र्यम्, अध्यवसायसहचरेषु साहसेष्वतिरतिः,[५१] अतिकर्कशपुरुषप्रतिसंसर्गादनन्यधर्षणीयता, मानावधारणम्,[५२] अकृपणं च शरीरयापनमिति[५३] ।

[उत्तमाङ्गनोपभोगः]

२०. उत्तमाङ्गनोपभोगेऽप्यर्थधर्मयोः सफलीकरणं, पुष्कलः

एकनिमित्तं मूलकारणं, तस्य । अमर्षस्य क्रोधस्य । वृद्धिः स्फीतिः । **अक्षेति**—अक्षाः पाशाः, तेषां हस्ताः प्रयोगाः, प्रक्षेपाः वा; भूम्यादिषु अक्षफलकस्थकोष्ठादिषु गोचराणां गतीनाम् । अत्यन्तम् अतिशयेन दुरुपलक्ष्याणां दुःखेन अवगन्तुं योग्यानाम् । कूटकर्मणां कपटव्यवहाराणाम् । उपलक्षणात् ज्ञानात् । अनन्तम् अगाधं बुद्धेः मतेः नैपुण्यं कौशलम् । **एकेति**—एकस्मिन् एकाकिनि विषये वस्तुनि उपसंहारात् चित्तस्य केन्द्रीकरणात् । अतिचित्रं विलक्षणम् । ऐकाग्र्यं स्थैर्यम् । **अध्यवसायेति**—अध्यवसायः परिश्रमः, तस्य सहचरेषु अनुगामिषु सखिषु वा । साहसेषु वीरकर्मसु । अतिरतिः परमप्रीतिः । **अतीति**—अतिकर्कशैः कठोरतमैः पुरुषैः जनैः सह प्रतिसंसर्गाद् संगत्याः व्यवहारात् वा । अनन्यधर्षणीयता अन्यैः परिभवनीयतायाः अभावः, अप्रधृष्यत्वमिति भावः । मानावधारणम् अभिमानदाढर्यम् । 'अभिमाननिश्चयः' इति भूषणा । अकृपणं वीतदैन्यम् । शरीरयापनं शरीरयात्रा ।

२०. **उत्तमाङ्गनेति**—इदानीम् उत्तमाङ्गनोपभोगे गुणाः वर्ण्यन्ते । उत्तमाः श्रेष्ठाः अङ्गनाः प्रशस्तावयवाः स्त्रियः, तासाम् उपभोगः सुखलाभः, तस्मिन् । अर्थः धनादिराज्यतन्त्रलोकव्यवहारादिसमूहः, धर्मः धार्यते इति । धारयति इति वा धर्मः; धर्मे यज्ञदानतपआदीनि कर्माणि

---

५१. अभिरतिः ५२. ० धीरणाम् ५३. ० शरीरवापनमिति

पुरुषाभिमानः, भावज्ञानकौशलम्, अलोभक्लिष्टमाचेष्टितम्, अखिलासु कलासु वैचक्षण्यम्, अलब्धोपलब्धिलब्धानुरक्षणरक्षितोपभोगभुक्तानुसन्धानरुष्टानुनयादिष्वजस्रमभ्युपायरचनया बुद्धिवाचोः पाटवम्, उत्कृष्टशरीरसंस्कारात् सुभगवेषतया लोकसम्भावनीयता,[५८] परं सुहृत्प्रियत्वं, गरीयसी परिजनव्यपेक्षा, स्मितपूर्वाभिभाषित्वम्, उद्रिक्तसत्त्वता, दाक्षिण्यानुवर्तनम्,

---

क्रियन्ते; एतयोः द्वयोः पुरुषार्थयोः । सफलीकरणं साफल्यापादनम् । पुष्कलः प्रभूतः । पुरुषस्य पुरुषत्वस्य अभिमानः गर्वः; पुरुषाय उचितः अभिमानः इति वा । भावानां मनोवृत्तीनां ज्ञाने अवबोधे कौशलं प्रावीण्यम् । अलोभेति—लोभेन क्लिष्टं व्याप्तं, तत् न भवति इति; गार्ध्यहीनमित्यर्थः । आचेष्टितं कर्म । वैचक्षण्यं प्रावीण्यम् । **अलब्धेति**—अलब्धेत्यादिः अनुनयादिपर्यन्तं द्वन्द्वः समासः । अलब्धस्य अप्राप्तस्य उपलब्धिः प्राप्तिः । लब्धस्य प्राप्तस्य अनुरक्षणं सततं पालनम् । रक्षितस्य सुष्ठु धारितस्य उपभोगः सेवनम् । भुक्तस्य सेवितस्य वस्तुनः अनुसन्धानं निरीक्षणम् । 'स्मृतिः' इति पदचन्द्रिका । रुष्टस्य रोषयुक्तस्य अनुनयः प्रीणनम् । अजस्रं सततम् । अभ्युपायरचनया उपायानां प्रयोगेण । बुद्धिः मतिः, वाक् भाषणं, तयोः । पाटवं चातुर्यम् । उत्कृष्टेति—उत्कृष्टः उत्तमः शरीरस्य देहस्य संस्कारः परिष्कृतिः, तस्मात् । सुभगः सुन्दरः वेषः वस्त्रादिसज्जा, तस्य भावः, तया । लोकसम्भावनीयता लोकमनोऽभिरामता । सुहृदां मित्राणां प्रियः अभीष्टः, तस्य भावः; अथवा—सुहृदः प्रियाः यस्य, तस्य भावः । गरीयसी सुविपुला परिजनानां व्यपेक्षा आदरः प्रणयो वा । स्मितम् ईषद्धसितं पूर्वं यस्मिन् कर्मणि तत् यथा स्यात् तथा अभिभाषित्वम् वार्तालापः । उद्रिक्ता

---

५८. ०नीयतया

अपत्योत्पादनेनोभयलोकश्रेयस्करत्वमिति ।

[पानम्]

२१. पानेऽपि नानाविधरोगभङ्ग†पटीयसामासवानामासेवनात् स्पृहणीयवयोऽवस्थापनम्[५५], अहंकारप्रकर्षादशेषदुःखतिरस्करणम्, अङ्गजरागदीपनादङ्गनोपभोगशक्तिसंधुक्षणम्, अपराधप्रमार्जनान्मनः[५६]शल्योन्मार्जनम्[५७], अश्राव्यशंसिभिरनर्गलप्रलापै[५८]र्विश्वासोपबृंहणं, मत्सराननुबन्धादानन्दैकतानता, शब्दादीनामिन्द्रियार्थानां सातत्येनानुभवः, संविभाग-

---

उपचिता सत्त्वता उत्साहः । अनुवर्तनं व्यवहारः । अपत्यानां सन्तानानाम् उत्पादनेन जननेन । उभयोः लोकयोः श्रेयस्करत्वं कल्याणप्रदत्वम् ।

२१. पान इति—इदानीं सुरापानेऽपि गुणाः सन्तीति वर्ण्यते । नानाविधानाम् अनेकप्रकाराणां रोगाणां गदानां भङ्गे नाशे पटीयसां कुशलानाम् । रागेति पाठे—"रागाणां विषयाभिलाषाणाम् । भङ्गे तरंगे विच्छित्तौ वा" इति बालबोधिनी । आसवानां मद्यानाम् । आसेवनात् पानात् । स्पृहणीयं कमनीयं वयः यौवनं, तस्य अवस्थापनम् आधानम् । अहंकारस्य आत्माभिमानस्य प्रकर्षाद् आधिक्यात् । दुःखानां कष्टानां तिरस्करणम् अधःकरणं व्यपोहनं वा । अङ्गजेति—अंगजरागस्य कामवेगस्य दीपनाद् वर्धनात् । संधुक्षणं वर्धनम् । अपराधप्रमार्जनात् अपराधानां विस्मृतेः । मनःशल्यस्य चित्तस्थशूलस्य उन्मार्जनं दूरीकरणम् । अश्राव्यशंसिभिः रहस्यप्रकाशकैः । अनर्गलप्रलापैः यथेष्टानर्थकवचनैः । उपबृंहणं वर्धनम् । मत्सरेति—मत्सरस्य ईर्ष्यायाः अननुबन्धात् अधारणात्, त्यागात् इति भावः । आनन्दस्य सुखस्य एकतानता अनन्यः

---

†०रागभङ्ग० ५५. ०वयोव्यवस्था० ५६. मानशल्यो० ५७. उन्मूलनम् ५८. अश्राव्य

शीलतया सुहृद्वर्गसंवर्गणम्[५३], अनुपमानमङ्गलावण्यम्, अनुत्तराणि विलसितानि, भयार्तिहरणाच्च सांग्रामिकत्वमिति ।

[वाक्पारुष्यदारुणदण्डार्थदूषणानि]

२२. वाक्पारुष्यं दण्डो दारुणो दूषणानि चार्थानामेव यथावकाशमौपकारिकाणि । नहि मुनिरिव नरपतिरुपशमरतिरभिभवितुमरिकुलमलम्, अवलम्बितुं च लोकतन्त्रम् इति ।

(अनन्तवर्मराज्येऽनाचारः)

२३. असावपि गुरूपदेशमिवात्यादरेण तस्य मतमन्ववर्तत ।

विस्तारः । शब्दादयः शब्दस्पर्शरूपरसगन्धाः इन्द्रियाणाम् अर्थाः विषयाः । संविभागशीलतया मित्रादिभ्यः सहपायिभ्यः आसववितरणेन । संवर्गणम् एकीकरणम् । अंगलावण्यं शरीरसौंदर्यम् । अनुत्तराणि विलक्षणानि अलौकिकानि वा । विलसितानि कामक्रीडाः चेष्टाः वा । आर्तिः दुःखम् । सांग्रामिकत्वं रणवीरत्वम् ।

२२. वाक्पारुष्यमिति—इदानीं शेषाणां त्रयाणां व्यसनानां—वाक्पारुष्यदारुणदण्डार्थदूषणानां गुणान् वक्ति । वाचः भाषणस्य पारुष्यं कठोरता । दारुणः कठोरः । दण्डः नियन्त्रणम् । अर्थानां धनानाम् । दूषणानि दुरुपयोगादयो दोषाः । यथावकाशं यथासमयम् । औपकारिकाणि लाभकराणि । भवन्तीति शेषः । न हीति—मुनिः अहिंसापरायणः वनवासी इति भावः । उपशमे मनःसंयमे–शान्तौ, अहिंसायां वा रतिः अभिरुचिः यस्य सः । अभिभवितुं विजेतुम् । अलं समर्थः । अवलम्बितुं धारयितुम् । लोकतन्त्रं प्रजाशासनाधिकारम् ।

२३. असावपीति—असौ अनन्तवर्मा । तस्य चन्द्रपालितस्य । अन्ववर्तत अपालयत्, तदनुसारम् अकरोत् इति भावः । तस्य शीलं वृत्तं

---

५३. सवर्धनम्

तच्छीलानुसारिण्यश्च प्रकृतयो विश्रृङ्खलमसेवन्त व्यसनानि। सर्वश्च समानदोषतया न कस्यचिच्छिद्रान्वेषणायायतिष्ट। समानभर्तृ प्रकृतयस्तन्त्राध्यक्षाः स्वानि कर्मफलान्यभक्षयन्। ततः क्रमादायद्वाराणि व्यशीर्यन्त। व्ययमुखानि विटविधेय[६०]तया विभोरहरहर्व्यवर्धन्त। सामन्तपौरजानपदमुख्याश्च समानशील-

---

तच्छीलम्, तत् अनुसर्तुम् अनुकर्तुम् अनुवर्तितुं वा शीलं यासां ताः; तस्य स्वभावस्यानुगामिन्यः इति भावः। प्रकृतयः प्रजाः। विश्रृङ्खलं स्वैरम्। समानः दोषः दुर्गुणः यस्य सः, तस्य भावः समानदोषता, तया। छिद्रस्य दोषस्य अन्वेषणाय आविष्करणाय। अयतिष्ट प्रयत्नमकरोत्। **समानेति**—समानाः सदृशाः भर्ता प्रकृतयश्च येषां,ते; समानाः भर्त्रा प्रकृतिभिः वा, अथवा समाना सदृशा भर्तुः स्वामिनः प्रकृतिः स्वभावः येषां, ते तन्त्राध्यक्षाः शासनाधिकारिणः। स्वानि स्वतन्त्रसम्बंधीनि। कर्मफलानि करादिरूपेण प्राप्तानि धनानि। 'पूर्वसुकृतफलानि' इति बालबोधिनी। 'तत्तत्कर्मणि लब्धानि राजधनानि' इति पदचन्द्रिका। अभक्षयन् आत्मसात् अकुर्वन्; राज्यकोपे नायच्छन् इति भावः। क्रमात् शनैः शनैः। आयद्वाराणि धनागमोपायाः। व्यशीर्यन्त अनश्यन् व्ययमुखानि धननिर्गमन द्वाराणि। विटविधेयतया विटानां विधेयता, तया विनयग्राहितया-वशवर्तितया; विटोपदेशानुसारमाचरणेन इति भावः। वैधेयतया इति पाठे मूर्खतया। विटः पिंगः तस्य लक्षणं विश्वनाथ एवं ददाति—

"संभोगहीनसंपद् विटस्तु धूर्तः कलैकदेशज्ञः।
वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्॥"

विभोः राज्ञः। अहरहः प्रतिदिनम्। **सामन्तेति**—सामन्ताः मण्डलस्वामिनः, पौरमुख्याः पुरे नगरे भवाः प्रमुखाधिकारिणः, जानपद-

---

६०. वैधेय

-तयोपारूढविश्रम्भेण राज्ञा सजानयः[६१] पानगोष्ठीष्वभ्यन्तरीकृताः स्वं स्वमाचारमत्यचारिषुः। तदङ्गनासु चानेकापदेशपूर्वमपाचरन्नरेन्द्रः। तदन्तःपुरेषु चामी भिन्नवृत्तेषु मन्दत्रासा वहुसुखैरवर्तन्त। सर्वश्च कुलाङ्गनाजनः [६२]पांसुलजनभङ्गिभाषणरतो भग्नचारित्रयन्त्रणस्तृणायापि न गणयित्वा भर्तॄन् धातृगणमन्त्रणान्यशृणोत्। तन्मूलाश्च कलहाः सामर्षाणामुदभवन्। अहन्यन्त दुर्वला वलिभिः। अपहृतानि धनवतां धनानि

मुख्याः जनपदे देशे ग्रामे वा भवाः प्रमुखाः अधिकारिणः। समानशीलतया सदृशस्वभावत्वेन। उपारूढः समुत्पन्नः विश्रम्भः विश्वासः यस्य, तेन। सजानयः स्त्रीसहिताः। पानगोष्ठीषु मद्यपानसभासु। अभ्यन्तरीकृताः प्रवेशिताः। अत्यचारिषुः अतिक्रमणं कृतवन्तः। **तदङ्गनेति**—तदङ्गनासु तेषां सामन्तादीनां जायासु। अनेके वहवः अपदेशाः व्याजाः पूर्वं यस्मिन् कर्मणि तद्यथा स्यात् तथा; सव्याजमित्यर्थः। अपाचरन् व्यभिचारमकरोत्। तदन्तःपुरेषु तस्य राज्ञः अन्तःपुरेषु अवरोधेषु, स्त्रीषु इत्यर्थः। अमी सामन्तादयः। भिन्नं वृत्तं येषां तेषु भिन्नवृत्तेषु नष्टचारित्रेषु अन्तःपुरेषु। मन्दत्रासाः क्षीणभयाः, निर्भया इति यावत्। **पांसुलजनेति**—पांसुलाः मलिनाः च ते जनाः च, लम्पटाः पुरुषाः इति यावत्, तेषां भङ्गिभाषणं वक्रोक्तयः, तत्र रतः आसक्तः। **भग्नेति**—भग्ना शीर्णा चारित्रस्य शीलस्य यन्त्रणा संयमः यस्य सः। धातृगणाः जाराः, तेषां मन्त्रणानि वचनानि। तन्मूलाः तानि कर्माणि मूलं कारणं येषां ते। सामर्षाणां तादृशः आचारस्य असहिष्णूनाम्। वलिभिः शक्तिशालिभिः।

---

६१. सजायाः; सजानपदाः

६२. सलग्नसुलभभङ्गि०; -सुलग्नसुलभभङ्गि०

तस्करादिभिः । [६३]अपहृतपरिभूतयः प्रहृताश्च पातकपथाः । हतबान्धवा हृतवित्ता वधबन्धातुराश्च मुक्तकण्ठमाक्रोशन्नश्रु-कण्ठ्यः प्रजाः । दण्डश्चायथाप्रणीतो भयक्रोधावजनयत् । कृश-कुटुम्बेषु लोभः पदमधत्त । विमानिताश्च तेजस्विनो [६४]माने-नादह्यन्त ।

[अनन्तवर्मराज्ये परोपजापाः]

२४. तेषु तेषु चाकृत्येषु प्रासरन् परोपजापाः । तदा च

अपहृतानि अपनीतानि । तस्करादिभिः चौरादिभिः । **अपहृतेति**— अपहृताः गताः परिभूतयः परिभवाः येभ्यः ते । 'परिहृतयः परिहाराः' इति भूषणा । प्रहृताः अनुसृताः । पातकानां पापानां पन्थानः मार्गाः । हताः नष्टा बान्धवाः सम्बंधिनः यासां, ताः । हृतं मुषितं वित्तं धनं यासां ताः । वधेन हिंसया बन्धेन कारागारादिषु प्रक्षेपेण च आतुराः पीडिताः । मुक्तकण्ठम् उच्चैः स्वरेण इति यावत् । आक्रोशन् आक्रन्दयन् । अश्रु-कण्ठ्यः अश्रूणि कण्ठे यासां, ताः; वाष्पगद्गदस्वराः इति भावः । अयथाप्रणीतः न्यायेन न प्रणीतः प्रयुक्तः; दण्ड्याः न दण्डिताः, अदण्ड्याः दण्डिताः; घोरेऽपराधे मृदुः, अल्पे अपराधे च कठोरः—एवंविधो दण्डः आसीदिति भावः । कृशेषु निर्धनेषु कुटुम्बेषु परिवारेषु; अथवा—कृशः कुटुम्बः येषां, तेषु; उभयत्र धनहीनेषु इति भावः । पदमधत्त प्राविशत् । विमानिताः अपमानिताः । तेजस्विनः प्रचण्डाः, वीराः वा । मानेना-दह्यन्त आत्मसम्मानेन अपीड्यन्त; प्रतीकारभावनया युक्ताः अभूवन् इति भावः ।

२४. **तेष्विति**—तेषु तेषु विविधेषु । अकृत्येषु दुष्कर्मसु । परोप-जापाः शत्रुप्रयुक्ताः भेदाः । तदा यस्मिन् काले शत्रुप्रयुक्ताः कपटनीतयः

---

६३. अपहृतपरिहृतयः   ६४. ०नोऽमानेन ।

[६५]मृगयुवेषमृगबाहुल्यवर्णनेनाद्रिद्रोणीरनपसारमार्गाः शुष्कतृणवंशगुल्माः प्रवेश्य द्वारतोऽग्निविसर्गैः, व्याघ्रादिवधे प्रोत्साह्य तन्मुखपातनैः, इष्टकूपतृष्णोत्पादनेनातिदूरहारितानां प्राणहारिभिः क्षुत्पिपासाभिवर्धनैः, [६६]तृणगुल्मगूढच्छन्नतटप्रदरपातहेतुभिर्विषममार्गप्रधावनैः, विषमुखीभिः क्षुरिकाभिश्चरणकण्टकोद्धरणैः, विष्वग्विसर[६७]विच्छिन्नानुयातृतयैकाकी-

---

विविधानि दुष्कर्माणि समपादयन् तस्मिन् काले । मृगयुवेषेति—मृगयुः व्याधः, तेषां वेषे रूपे मृगाणां हरिणादिवन्यपशूनां बाहुल्यस्य प्रचुरतायाः वर्णनेन कथनेन; प्रोत्साह्य इति शेषः । अद्रिद्रोणीः उपत्यकाः । अनपसारमार्गाः निर्गमनमार्गहीनाः । शुष्काणि अनार्द्राणि तृणानि घासः वंशाः कीचकाः गुल्माः कण्टकादीनां स्तम्बाः च यासु ताः । अग्निविसर्गैः अग्निदानैः तृणादीनि अग्निसात् कृत्वेति भावः । तस्य व्याघ्रादेः मुखे आनने पातनैः प्रक्षेपणैः; व्याघ्रादिनामाक्रमणपरिधौ आनीय असहायान् परित्यज्य स्वयमपसृत्य; व्याघ्रादीनां कवलं सम्पाद्येति भावः । इष्टकूपेति—इष्टाय अभिमताय कूपाय उदपानाय तृष्णायाः लालसायाः उत्पादनेन सृजनेन । प्राणान् हर्तुं नाशयितुं शीलं येषां, तैः । क्षुत् बुभुक्षा । तृणेति—तृणैः गुल्मैः च गूढं गुप्तं यथा स्यात् तथा छन्नेषु आच्छादितेषु तटेषु उन्नतप्रदेशेषु प्रदरेषु नीचभागेषु च पातहेतुभिः पातनैः; तादृशेषु स्थानेषु पातयित्वेति सारः । विषमेषु कठिनेषु मार्गेषु पथिषु प्रधावनैः द्रुतगत्या चालनैः वेगेन गमनैः वा । तान् निम्नोन्नतप्रदेशेषु सवेगं गमयित्वा अवः अपातयन् इति भावः । विषेति—विषं गरलं मुखे अग्रभागे यासां, ताभिः । विषदिग्धाभिः । चरणात् पादात् कण्टकानाम् उद्धरणैः निष्कासनैः । अस्मिन् कर्मणि क्षुरिकामुखाग्राणां विषः

---

६५. मृगाटवीषु मृगबाहु० ६६. गुलमतृण ६७. प्रचार

कृतानां यथेष्टघातनैः, मृगदेहापराद्धैर्नमिषुमोक्षणैः, सपणबंधमधिरुह्याद्रिश्रृङ्गाणि दुरधिरोहाण्यनन्यलक्ष्यैः प्रभ्रंशनैः, आटविकछद्मना विपिनेषु विरलसैनिकानां प्रतिरोधनैः, अक्षद्यूतपक्षियुद्धयात्रोत्सवादिसंकुलेषु बलवदनुप्रवेशनैरितरेषां हिंसोत्पादनैः, गूढोत्पादितव्यलीकेभ्योऽप्रियाणि प्रकाशं लब्ध्वा साक्षिषु तद्विख्याप्याकीर्तिगुप्तिहेतुभिः पराक्रमैः, परकलत्रेषु सुहृत्त्वे-

---

रक्तसंचारेण सह चरणात् शरीरे व्याप्य जनान् नाशयति। विष्वक् सर्वतः यो विसरः विचरणं, तेन विच्छिन्नाः पृथग्भूताः अनुयातारः अनुचराः येषां, तेषां भावः; तया। एकाकीकृतानाम् अन्येभ्यः वियुज्य एककः एव कृतानां सम्पादितानाम्। यथेष्टघातनैः इच्छानुसारं वधैः। मृगदेहेति—मृगाणां हरिणानां देहेभ्यः शरीरेभ्यः अपराद्धैः लक्ष्यच्युतैः। इषुमोक्षणैः बाणप्रक्षेपैः। सपणबन्धं पणस्य समयस्य बन्धः करणं, तेन सह यथा स्यात् तथा; समयं कृत्वा इति भावः। दुरधिरोहाणि दुःखेन आक्रमितुं योग्यानि। अनन्यलक्ष्यैः इतरैः अदृष्टैः। प्रभ्रंशनैः पातनैः। आटविकाः शबराः, तेषां छद्मना कपटेन व्याजेन वा। विरलाः अल्पाः सैनिकाः योधाः येषां, तेषाम्; एवंविधराजपुरुषाणामिति भावः। अथवा विरलानाम् अल्पसंख्याकानां सैनिकानां भटानाम्। प्रतिरोधनैः प्रतियोधनैः। अक्षेति—अक्षाः पाशाः, द्यूतः पणः, पक्षिणां खगानां युद्धं संग्रामः, यात्राः बहिर्गमनरूपाः, उत्सवः महः। तानि आदौ येषां, तेषां संकुलेषु संरम्भेषु। बलवद् सरभसम्। अनुप्रवेशनैः गमनैः। हिंसोत्पादनैः वधैः। गूढेति—गूढं गुप्तं यथा स्यात् तथा उत्पादितेभ्यः जनितेभ्यः व्यलीकेभ्यः दुःखेभ्यः। अप्रियाणि दुःखानि वेदनानि, अभियोगान् वा। प्रकाशं सर्वप्रत्यक्षम्। साक्षिषु तद् विख्याप्य पूर्वं तम् अभियोगविषयं साक्षिणः कथयित्वा, पश्चात् अभियोगश्रवणे तदेव तैः साक्षिभिः श्रावयित्वा इत्याशयः। अकीर्तीति—अकीर्तिः अपयशः, तस्याः गुप्तिः अप्रकाशनं

नाभियोज्य जारान् भर्तृनुभयं[६८] वा प्रहृत्य तत्साहसोपन्यासैः, [६९]योगनारीहारितानां संकेतेषु प्रागुपनिलीय पश्चादभिद्रुत्या-कीर्तनीयैः प्रमापणैः, उपप्रलोभ्य विलप्रवेशेषु निधानखननेषु मंत्र-साधनेषु च विघ्नव्याजसाध्यैर्व्यापादनैः, मत्तगजाधिरोहणाय प्रेर्य प्रत्यपायनिवर्तनैः[७०], व्यालहस्तिनं कोपयित्वा लक्ष्यीकृत-मुख्यमण्डलेष्वपक्रमणैः,[७१] दायाद्यर्थे विवदमानानुपांशु

हेतुः कारणं येषां, तैः । पराक्रमैः हिंसादिसाहसकर्मभिः । परकलत्रेषु परकीयासु स्त्रीषु । सुहृत्त्वेन मित्ररूपेण । अभियोज्य संगमय्य । भर्तॄन् कलत्राणां पतीन् । उभयं पतिं कलत्रं च । प्रहृत्य हत्वा । तस्य साहसस्य दुष्कर्मणः उपन्यासैः प्रख्यापनप्रबन्धैः । योगनारीति—योगा नारी; 'योगो विस्रब्धघाती स्यात् इति कोपः' इति पदचन्द्रिका; याः जनं प्रलोभ्य स्थानविशेषेषु नीत्वा तं घातयन्ति, ताः प्रयोजनविशेषेण नियोजिताः नार्यः योगनार्य उच्यन्ते; तादृशीभिः युवतिभिः हारितानां प्रलोभितानाम् । संकेतेषु निश्चितेषु स्थानेषु । उपनिलीय प्रच्छन्नं स्थित्वा । अभिद्रुत्य आक्रम्य । अकीर्तनीयैः निन्दनीयैः । प्रमापणैः हिंसनैः । विलानि संकुचितद्वाराणि सान्धकाराणि भूमिगतानि पशुभिरुत्खातानि छिद्राणि; गुहाः वा । निधानखननेषु धनादेः भूमिस्थस्य गूढकोपस्य अवदारणेषु । मन्त्रसाधनेषु तन्त्रादिग्रन्थेषु विहितान् विधीन् अनु-सृत्य मन्त्रान् संसाध्य अलौकिकाः शक्तीः प्राप्नुवन्ति जनाः इति प्रसिद्धिः; तादृशेषु मन्त्रसिद्धिकर्मसु इत्यभिप्रायः; एतेषु सर्वेषु कर्मसु बहुविधाः बाधाः मनुष्यं प्रहरन्तीति सर्वे जानन्ति । व्यापादनैः हिंसनैः । प्रत्यपायाः नाशप्रतिबन्धकाः उपायाः, तेषां निवर्तनैः दूरीकरणैः अप्रयोगैः वा । व्यालहस्ती दुष्टो गजः, तम् । लक्ष्यीति—लक्ष्यीकृतानि शरव्यीकृतानि

६८. भर्तृभयमपहृत्य ६९. योग्य ७०. प्रत्यवायनिर्वर्तनैः
७१. अक्रमपणैः; अभर्पणैः

हत्वा प्रतिपक्षेष्वयशःपातनैः, सामन्तपुरजनपदेष्वयथावृत्तान-प्रकाशमभिप्रहृत्य तद्वैरिनामघोषणैः, [७२]योगाङ्गनाभिरहर्निशमभिरमय्य राजयक्ष्मोत्पादनैः,वस्त्राभरणमाल्याङ्गरागादिषु [७३]रसविधानकौशलैः, चिकित्सामुखेनामयोपबृंहणै[७४]रन्यैश्चाभ्युपायैरश्मकेन्द्रप्रयुक्तास्तीक्ष्णरसदादयः प्रक्षपितप्रवीरमनन्तवर्मकटकं जर्जरमकुर्वन् ।

[वसन्तभानोः षड्यन्त्रं वानवास्यस्य च विद्रोहः]

२५. अथ वसन्तभानुर्भानुवर्माणं नाम वानवास्यं प्रोत्साह्यानन्तवर्मणा व्यग्राहयत् । तत्परामृष्टराष्ट्रपर्यन्तश्चानन्तवर्मा

मुख्यानां प्रधानपुरुषाणां मण्डलानि समूहाः, तेषु । अपक्रमणैः मोचनैः । दायः पितृपितामहादिभ्यः प्राप्तं धनादिकम् । उपांशु गूढम् । प्रतिपक्षेषु अरिषु, अनन्तवर्मणः पुरुषेषु, यतः एते सर्वे तस्य शत्रोरुपजापाः सन्ति । अयथावृत्तान् कुपथगामिनः । तस्य वैरिणां शत्रूणां घोषणैः प्रख्यापनैः । योगांगनाभिः औषधविशेषभक्षणेन मैथुने राजयक्ष्मोत्पादकगुणैः युक्ताः स्त्रियः योगांगनाः, ताभिः । अभिरमय्य मैथुनं कारयित्वा । राजयक्ष्मा रोगविशेषः । स च घातकः भवति । रसविधानकौशलैः विषप्रयोगनैपुण्यैः । **चिकित्सेति**—चिकित्सायाः रोगनिवारणस्य मुखेन व्याजेन । आमयस्य रोगस्य उपबृंहणैः वर्धनैः । अभ्युपायैः साधनैः । तीक्ष्णं घोरं रसं विषं ददाति इति तीक्ष्णरसदः, ते आदौ येषां ते । प्रक्षपितप्रवीरं प्रक्षपिताः नाशिताः प्रकृष्टाः उत्तमाः वीराः योधाः यस्य तत् । जर्जरं शिथिलं बलहीनं वा ।

२५. **अथेति**—वानवास्यं वनवास्याः राजा, तम् । व्यग्राहयत् युद्धे प्रावर्तयत् । तेन परामृष्टः आक्रान्तः राष्ट्रस्य राज्यस्य पर्यन्तः

---

७२. योग्या ७३. रसधान ७४. उपवर्हणैः

तमभियोक्तुं वलसमुत्थानमकरोत् । सर्वसामन्तेभ्यश्चाश्मकेन्द्रः प्रागुपेत्यास्य प्रियतरोऽभूत् । अपरेऽपिसामन्ताः समगंसत । गत्वा चाभ्यर्णे[७५] नर्मदारोधसि न्यविशन् ।

२६. तस्मिंश्चावसरे महासामन्तस्य कुन्तलपतेरवन्तिदेवस्यात्मनाटकीयां क्ष्मातलोर्वशीं नाम चन्द्रपालितादिभिरतिप्रशस्तनृत्यकौशलामाहूयानन्तवर्मा नृत्यमद्राक्षीत् । अतिरक्तश्च भुक्तवानिमां मधुमत्ताम्[७६] । अश्मकेन्द्रस्तु कुन्तलपतिमेकान्ते समभ्यधत्त—'प्रमत्त एष राजा कलत्राणि नः परामृशति । कियत्यवज्ञा सोढव्या । मम शतमस्ति हस्तिनां पञ्चशतानि च ते । तदावां संभूय मुरलेशं वीरसेनमृषीकेश[७७]मेकवीरं

सीमाप्रदेशः यस्य सः । अभियोक्तुं युद्धे आक्रमितुम् । वलस्य सेनायाः समुत्थानं प्रयाणम् । अस्य अनन्तवर्मणः । प्रियतरः अन्येभ्योऽधिकः प्रियः प्रियतरः । समगंसत अमिलन् । अभ्यर्णे समीपे । रोधसि तीरे । न्यविशन् स्कन्धावारं स्थापितवन्तः ।

२६. तस्मिंश्चेति—महान् चासौ सामन्तः च, तस्य । आत्मनाटकीयां स्वीयां नर्तकीम् । क्ष्मातलस्य पृथिवीतलस्य । उर्वशीम् अप्सरोविशेषम्; उर्वश्याः अन्यूनामित्यर्थः । अतिप्रशस्तेति—अति प्रभूतं मुहुर्मुहुः वा प्रशस्तं श्रेष्ठं प्रशंसितमिति यावत्, कौशलं नर्तनचातुर्यं यस्याः, ताम् । अतिरक्तः कामवेगेनोन्मत्तः । भुक्तवान् सेवितवान् । मधुमत्तां मधुना आसवपानेन मत्तां निर्विवेकामुन्मदाम् । समभ्यधत्त अकथयत् । प्रमत्तः विवेकहीनः, उन्मादीति भावः । नः अस्माकं, युष्माकमस्माकं च इति भावः । परामृशति उपभुङ्क्ते; धर्षयति व्यभिचरति ।

---

७५. चाभ्यन्तरे ७६. वधुत्तमाम्; वधूत्तमाम् ७७. ऋचीके०

कोङ्कणपतिं कुमारगुप्तं [७८]नासिक्यनाथं च नागपालमुपजपाव[७९]। ते चावश्यमस्याविनयमसहमाना अस्मन्मतेनैवोपावर्तेरन् । अयं च वानवास्यः [८०]प्रियं मे मित्रम् । अमुनैनं दुर्विनीतमग्रतो व्यतिषक्तं पृष्ठतः प्राहरेम । कोशवाहनं च विभज्य गृह्णीमः' इति । हृष्टेन चामुनाभ्युपेते विंशतिं वरांशुकानां पञ्चविंशतिं काञ्चनकुङ्कुमकम्बलानां प्राभृतीकृत्याप्तमुखेन तैः सामन्तैः समन्त्र्य तानपि स्वमतावस्थापयत् ।

अवज्ञा तिरस्कारः । सोढव्या उपेक्ष्या । संभूय मिलित्वा । उपजपाव अस्माद् अनन्तवर्मणः भिनदाव । अविनयं दुःशीलताम् । अस्मन्मतेन अस्माकं विचारेण । उपावर्तेरन् सहमताः अनुकूलाः वा स्युः । वानवास्येति—वनवास्याः राजा वानवास्यः भानुवर्मा नाम । प्रियम् अन्तरङ्गं विश्वासपात्रं वचनानुवर्ति च । अमुना वानवास्येन । एनम् अनन्तवर्माणम् । दुर्विनीतं दुराचारिणम् उद्धतं वा । व्यतिषक्तं युद्धे व्यापृतम् । प्राहरेम अभिगच्छेम—आक्रमणं कुर्याम । कोशः च वाहनं च, तयोः समाहारः, तत् । विभज्य विभागं कृत्वा । अमुना कुन्तलपतिना अवन्तिदेवेन । अभ्युपेते वसन्तभानोः मते अङ्गीकृते । वरांशुकानां बहुमूल्यवस्त्राणाम् । काञ्चनकुङ्कुमकम्बलानां रक्तकेसररञ्जितकम्बलानाम् । प्राभृतीकृत्य उपायनीकृत्य । आप्तमुखेन आप्ताः विश्वस्ताः पुरुषाः, तेषां मुखेन—वचनेन इति यावत् । संमन्त्र्य विचारं कृत्वा । स्वमतावस्थापयत् सहमतान् व्यदधात् ।

---

७८. सासिक्य

७९. उपजपावः ।

८०. परम्

[अनन्तवर्मणो नाशः, वसन्तभानोश्च धूर्तता]

२७. उत्तरेद्युस्तेषां सामन्तानां वानवास्यस्य चानन्तवर्मा नयद्वेषादामिषत्वमगमत्[८१]। वसन्तभानुश्च 'तत्कोशवाहनमवशीर्णमात्माधिष्ठितमेव कृत्वा[८२]यथाबलं च विभज्य गृह्णीत। युष्मदनुज्ञया येन केनचिदंशेनाहं तुष्यामि' इति शाठ्यात् सर्वानुवर्ती तेनैवामिषेण [८३]निमित्तीकृतेनोत्पादितकलहः सर्वसामन्तानध्वंसयत्। तदीयं च सर्वस्वं स्वयमेवाग्रसत्। वानवास्यं केनचिदंशेनानुगृह्य प्रत्यावृत्य सर्वमनन्तवर्मराज्यमात्मसादकरोत्।

---

२७. उत्तरेद्युरिति—नयद्वेषात् दण्डनीतिं प्रति अवज्ञायाः कारणात्। आमिषत्वमगमत् कवलं–भोग्यवस्तु जातः; तैः हतः इत्यर्थः। तस्य अनन्तवर्मणः कोशवाहनमिति तत्कोशवाहनम्। अवशीर्णं विध्वस्तम्। आत्माधिष्ठितं स्वहस्तगतम्। यथाबलं स्वस्य स्वस्य बलस्य सेनायाः अनुरूपम्; सेनापरिमाणानुसारमित्यर्थः। युष्मदनुज्ञया युष्माकं सर्वेषां सामन्तानाम् अनुज्ञया अनुमत्या। येन केनचित् स्वल्पेनैव युष्माभिर्दत्तेन। शाठ्यात् कपटात्। सर्वानुवर्ती सर्वेषां प्रीणयिता। आमिषेण मांसकवलेन–प्रलोभनवस्तुना इति भावः। निमित्तीकृतेन कारणीभूतेन। उत्पादितः जनितः कलहः संघर्षः येन सः। अध्वंसयत् अन्योन्येन अघातयत्। अनुगृह्य प्रसादीकृत्य। प्रत्यावृत्य प्रत्यागत्य; युद्धस्थलात् शिविरं प्रत्यागत्य, अथवा स्वकीयाम् अनन्तवर्मणः वा राजधानीमुपेत्य। आत्मसात् आत्माधीनम्।

---

८१. अगच्छत् ८२. यथाप्रयासं यथाबलम्; यथान्यासं यथाबलम्

८३. निमित्तीकृत्य

[वसुरक्षितस्यापक्रमणं मृत्युश्च]

२८. अस्मिंश्चान्तरे[८४] मन्त्रिवृद्धो वसुरक्षितः कैश्चिन्मौलैः संभूय बालमेनं भास्करवर्माणमस्यैव ज्यायसीं भगिनीं त्रयोदशवर्षां मञ्जुवादिनीमनयोश्च मातरं महादेवीं वसुन्धरामादायापसर्पन्नापदोऽस्या भावितया दाहज्वरेण देहमजहात्।

[मित्रवर्महिंसाप्रक्रमाद्भास्करवर्मरक्षणम्]

२९. अस्मादृशैर्मित्रैस्तु[८५] नीत्वा माहिष्मतीं भर्तृद्वैमातुराय भ्रात्रे मित्रवर्मणे सापत्या देवी दर्शिताभूत्। तां चार्यामनार्योऽसावन्यथाभ्यमन्यत। निर्भर्त्सितश्च तया 'सुतमियमखण्डचारित्रा राज्यार्हं चिकीर्षति' इति नैर्घृण्यात्तमेनं बाल-

---

२८. **अस्मिन्निति**—मौलैः कुलक्रमागतैः प्रधानपुरुषैः। संभूय मिलित्वा ज्यायसीमग्रजाम्। भगिनीं स्वसारम्। महादेवीम् अग्रमहिषीम्। अपसर्पन् पलायमानः। भावितया नियतत्वात्। दाहज्वरेण सन्निपातज्वरेण। देहम् अजहात् शरीरम् अत्यजत्, अम्रियत इत्यर्थः।

२९. **अस्मादृशैरिति**—भर्तृद्वैमातुराय द्वयोः मात्रोरपत्यं पुमान् द्वैमातुरः; भर्तुः स्वामिनः अनन्तवर्मणः द्वैमातुराय भ्रात्रे सापत्नभ्रात्रे—विमातुः पुत्राय। सापत्या अपत्येन सहिता ससन्ताना—पुत्रपुत्रीसहिता इति यावत्। दर्शिताभूत् साक्षात्कारिता—समर्पिता। आर्यां साध्वीं पतिव्रताम्। अन्यथा औपयिकीं भार्याम्। निर्भर्त्सितः प्रत्याख्यातः। अखण्डचारित्रा सती। राज्यार्हं राज्याधिकारिणम्।

---

८४. अवसरे ८५. अस्मन्मित्रैस्तु

मजिघांसीत्[८६] । इदं तु ज्ञात्वा देव्याहमाज्ञप्तः—'तात नालीजङ्घ, जीवतानेनार्भकेण यत्र क्वचिदववाय[८७] जीव[८८] । जीवेयं चेदहमप्येनमनुसरिष्यामि । ज्ञापय मां क्षेमप्रवृत्तः स्ववार्ताम्' इति ।

[भास्करवर्मणो विन्ध्यवने आगमनम्]

३०. अहं तु संकुले राजकुले कथंचिदेनं निर्गमय्य विन्ध्याटवीं व्यगाहिषि । पादचारदुःखितं[८९] चैनमाश्वासयितुं, घोषे क्वचिदहानि कानिचिद्विश्रमय्य, तत्रापि राजपुरुषसंपातभीतो दूरा-

नैर्घृण्यात् क्रूरतया । अजिघांसीत् हन्तुमैच्छत् । आज्ञप्तः आदिष्टः । जीवता प्राणधारिणा; यावत् न हन्यते मित्रवर्मणा तावदेव इति भावः । अर्भकेण बालकेन । यत्र क्वचिद् अज्ञाते स्थाने । अववाय अवहितं (गूढं) नीत्वा परिपालयन् । जीव निवस । क्षेमप्रवृत्तः क्षेमेण कुशलपूर्वकं प्रवृत्तः इतः निर्गत्य अज्ञाते स्थाने उषितः । स्ववार्तां स्वयोः नालीजंघभास्करवर्मणोः वार्त्तां समाचारं स्थितिं वा ।

३०. अहमिति—संकुले जनैः भरिते । राजकुले राजप्रासादे । कथंचित् कष्टेन, यथा तथा वा । निर्गमय्य निष्कास्य । व्यगाहिषि प्रविष्टः । पादाभ्यां चरणाभ्यां चारः गमनं, तेन दुःखितं पीडितं, श्रान्तमिति यावत् । आश्वासयितुं विश्रमयितुं, स्वस्थतामापादयितुमिति वा । घोषे आभीरग्रामटिकायाम् । विश्रमय्य विश्रामं कारयित्वा पादचारजनितां श्रान्तिं पीडां वा अपनीय इति भावः । राजपुरुषाणां मित्रवर्मणः सेवकानां संपातात् आगमनात् भीतः त्रस्तः । दूरमध्वनि

८६. अजिघांसत् ८७. अवन्याय ८८. जीवेः

८९. दुःस्थितं; पादचारिणं

ध्वमपासरम्[६०]। तत्रास्य दारुणपिपासापीडितस्य वारि दातु-कामः कूपेऽस्मिन्नपभ्रश्य पतितस्त्वयैवमनुगृहीतः। त्वमेवास्यातः शरणमेधि विशरणस्य राजसूनोः' इत्यञ्जलिमवध्नात्।

[विश्रुतस्याश्मकेन्द्रोन्मूलनप्रतिज्ञा, भास्करवर्मणः क्षुधानिवृत्तिश्च]

३१. 'किमीया[६१] जात्यास्य माता' इत्यनुयुक्ते मयामुनोक्तम्—'पाटलिपुत्रस्य वणिजो वैश्रवणस्य दुहितरि सागरदत्तायां कोसलेन्द्रात् कुसुमधन्वनोऽस्य माता जाता' इति। 'यद्येवमेतन्मातुर्मत्पितुश्चैको मातामहः' इति सस्नेहं तमहं

इति दूराध्वं दूरमार्गं, विप्रकृष्टान्तरे इति भावः। दारुणा घोरा कष्टदायिनी पिपासा तृषा, तया पीडितः दुःखितः, तस्य। दातुं कामः इच्छा यस्य सः दातुकामः—दातुमनाः। अपभ्रश्य स्खलित्वा। अनुगृहीतः कृपां प्रदर्श्य निष्कासितः आश्वासितश्च। अतः अस्मात् परं कारणात् वा। शरणम् आश्रयः, रक्षकः इति भावः। एधि भव। विशरणस्य शरणरहितस्य। राजसूनोः नृपकुमारभास्करवर्मणः। अञ्जलिमवध्नात् मस्तके हस्तौ समानीतवान्।

३१ **किमीयेति**—कस्य इयमिति किमीया। जातेः जन्मनः (वंशस्य इति भावः) इयम् इति जात्या। अस्य मातुः जन्म कस्मिन् कुले जातमिति तात्पर्यम्। अनुयुक्ते प्रश्ने पृष्टे सति। मया विश्रुतेन। अमुना नालीजङ्घेन। वणिजः व्यापारिणः वैश्यस्य। कुसुमधन्वनः एतन्नाम्नः कोसलेशात्; साक्षात् कामदेवात् इति वा। एतन्मातुः एतस्य भास्करवर्मणः मातुः जनन्याः। मातामहः मातुः पिता। स्नेहेन

---

६०. दूरध्वमपसरन्नत्रास्य   ६१. किमीयीऽयमित्यनुयुक्ते

सस्वजे । वृद्धेनोक्तम्—'सिधुदत्तापुत्राणां[६२] कतमस्ते पिता' इति । 'सुश्रुत' इत्युक्ते सोऽत्यहृष्यत् । अहं तु 'तं [६३]नयावलिप्तमश्मकेन्द्रं नयेनैवोन्मूल्य बालमेनं पित्र्ये पदे प्रतिष्ठापयेयम्' इति प्रतिज्ञाय 'कथमस्यैना क्षुधं क्षपयेयम्' इत्यचिंतयम् । तावदापतितौ च कस्यापि व्याधस्य त्रीनिषूनतीत्य द्वौ मृगौ स च व्याधः । तस्य हस्तादवशिष्टमिपुद्वयं कोदण्डं चाक्षिप्याविध्यम्[६४]। एकः[६५] सपत्राकृतोऽन्यश्च निष्पत्राकृतोऽपतत् । तं चैकं मृगं

प्रेम्णा सहितं यथा स्यात् तथा सस्नेहम् । सस्वजे आलिलिङ्ग । अहमिति—तं दुष्टमनन्तवर्मणो राज्यापहारिणं वसन्तभानुम् । नयावलिप्तं नयेन नीत्या अर्थशास्त्रज्ञानप्रयोगाभ्याम् अवलिप्तमुत्सिक्तम् । उन्मूल्य समुत्पाट्य । पित्र्ये पदे पितुः राज्ये इति भावः । प्रतिष्ठापयेयं स्थापयिष्यामि । प्रतिज्ञाय प्रतिश्रुत्य । क्षुधं बुभुक्षाम् । क्षपयेयं दूरीकुर्याम् । तावदिति—आपतितौ धावन्तौ आगतौ । व्याधस्य आखेटकस्य । इपून् बाणान् । अतीत्य व्यर्थीकृत्य । त्रिभ्यः बाणेभ्यः आत्मानौ रक्षित्वा इत्याशयः । तस्य व्याधस्य । अवशिष्टमिपुद्वयं शेषौ द्वौ बाणौ । कोदण्डं धनुः । आक्षिप्य आच्छिद्य, गृहीत्वा इत्यर्थः । अविध्यम् तौ मृगौ अहनम् । सपत्राकृतः—पत्रेण छदेन सहितः बाणः सपत्रः; सपत्रेण अतिव्यथया कृतः विद्धः; पुंखप्रदेशं याव प्रविष्टेन बाणेन हतः इत्याशयः । निष्पत्राकृतः—निर्गतः पत्रेभ्यः छदेभ्यः इति निष्पत्रः बाणः । निष्पत्रेण अतिव्यथया कृतः विद्धः; पुंखप्रदेशं यावत् बाणस्य प्रवेशं विना एव हतः इति भावः । 'सपत्रनिष्पत्रादतिव्यथने' इति डाच् । भट्टोजिदीक्षितस्य व्याख्यानं भिन्नमस्ति—'सपत्राकरोति—मृगम् । सपुङ्खशरप्रवेशेन सपत्रं करोतीत्यर्थः । निष्पत्राकरोति । सपुङ्खस्य शरस्यापरपार्श्वे निर्गमनान्निष्पत्रं

---

६२. ०दत्तपु०   ६३. दुर्नयाव०   ६४, अवधिपम्   ६५. एकश्च

दत्त्वा मृगयवे, अन्यस्यापलोमत्वचः क्लोमापोह्य, निष्कुलाकृत्य, विकृत्योर्वस्थिग्रीवादीनि[६६], शूलाकृत्य दावाङ्गारेषु, तप्तेनामिषेण तयोरात्मनश्च क्षुधमत्यतार्षम्[६७]। एतस्मिन् कर्मणि मत्सौष्ठवे-

---

करोतीत्यर्थः'। परं बालमनोरमाव्याख्यायां वासुदेवदीक्षितो भट्टोजिदीक्षितस्य 'सपत्रं निष्पत्रं वा करोमि भूतलम्' इति प्रत्युदाहरणयोः—'पुङ्खपर्यन्तं पुङ्खवर्जं वा शरप्रवेशनेन सपत्रं निष्पत्रं वा भूतलं करोतीत्यर्थः' इति व्याख्याने उपर्युक्तमस्मद्व्याख्यानमेव प्रकाशयति। भट्टोजिदीक्षितमतानुसारं निष्पत्राकृतस्य 'यथा शरः शरीरात् अपरपार्श्वे गतः तथा विद्धः' इति भावः आयाति। दण्डिनो भावस्तु अयं प्रतिभाति—एकः शरः तु पुङ्खप्रदेशं यावत् मृगशरीरे प्रविष्टः। अपरः शरः पुङ्खप्रदेशात् प्रागेव शल्यस्य समीपतरेण अंशेन एव प्रविष्टः। तं चैकमिति—तमितिपदं निष्पत्राकृतमृगं निर्दिशत् प्रतिभाति; अथवा तयोः हतयोः मृगयोः एकं मृगमित्येव भावः स्यात्। मृगयवे व्याधाय। अपलोमत्वचः। अपनीतानि लोमानि त्वचा च यस्य, तस्य अपनीतरोमचर्मणः। 'क्लोम मस्तिष्कम्' इति अमरः। 'क्लोमा वरुणः' इति शातपथश्रुतौ इदं फुप्फुसवाचकम्। अपोह्य अपनीय। निष्कुलाकृत्य निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति निष्कुलः निष्कासितावयवः, तथाविधं कृत्वा; सर्वाणि अङ्गानि बहिर्निष्कास्य इति भावः। विकृत्य छित्त्वा। ऊरू जंघे च अस्थीनि कीकसानि च ग्रीवा कन्धरा च इति उर्वस्थिग्रीवाः, ताः आदौ येषां तानि; अंगानि इति शेषः। शूलाकृत्य शूलेन पाचयित्वा; शूले स्थापयित्वा अनलस्योपरि तप्त्वा पाचनं शूलाकरणम्। 'अत्र करोतिः पाके वर्तते' इति बालमनोरमा। दावाङ्गारेषु वनाग्नौ। तप्तेन भर्जितेन, उष्णेन इति वा। आमिषेण मांसेन। तयोः नालीजंघभास्करवर्मणोः। आत्मनः विश्रुतस्य। अत्यतार्षम् अपानैषम्। एतस्मिन्निति—एतस्मिन् मृग-

---

६६. ०र्वोङ्घ्रग्री०

६७. अत्यताप्सम्; अतक्षिपम्; अतार्षम्

नातिहृष्टं किरातमस्मि पृष्टवान्–'अपि जानासि माहिष्मती-वृत्तान्तम्' ? इति ।

[प्रचण्डवर्मणो मञ्जुवादिनीविवाहविलिप्सासमाचारः]

३२. असावाचष्ट—'तत्र व्याघ्रत्वचो दृतीश्च विक्रीयाद्यैवागतः । किं न जानामि ? प्रचण्डवर्मा नाम चण्डवर्मानुजो मित्रवर्मदुहितरं मञ्जुवादिनीं विलिप्सुरभ्येतीति तेनोत्सवोत्तरा[६८] पुरी' इति ।

वधादिनि कर्माणि । मम सौष्ठवेन कौशलेन । अतिहृष्टं परमप्रीतम् । किरातं मृगयुम् । अस्मि अहम्; अव्ययमिदं, न क्रियापदम् । पृष्टवान् अपृच्छम् । अपि किम्; प्रश्नवाचकोऽप्ययं शब्दः । माहिष्मतीवृत्तान्तं माहिष्मतीनगर्यां कीदृशी राजनीतिः, कीदृग् घटनाचक्रं वा प्रचलति इति समाचारम् ।

३२. असाविति—असौ व्याधः । आचष्ट अकथयत् । व्याघ्रत्वचः शार्दूलानां चर्माणि । दृतीः चर्मपुटानि । विक्रीय विपण्य । अद्य अस्मिन्नेव दिने, अधुनैव वा । किं कथम् । अवश्यं जानामीति भावः । चण्डवर्मानुजः चण्डवर्मणः अनुजः कनीयान् भ्राता । मित्रवर्मणः द्वैमातुरभ्रातुः दुहितरं पुत्रीम्; पितुः तुल्यत्वात् संरक्षकत्वात् च मित्रवर्मात्र मञ्जुवादिन्याः पितृत्वेन वर्णितः; अथवा दुहितृपदं दुहितृतुल्यामिति भावस्य द्योतकं स्यात् । विलिप्सुः प्राप्तुम् इच्छन् । अभ्येति आगच्छति । उत्सवोत्तरा आनन्दपूर्णा ।

---

६८. सोत्सवा

(मित्रगुप्तस्योपधिः)

३३. अथ कर्णे जीर्णमब्रवम्—"धूर्तो मित्रवर्मा दुहितरि सम्यक्प्रतिपत्त्या मातरं विश्वास्य तन्मुखेन प्रत्याकृष्य बालकं जिघांसति। तत्प्रतिगत्य कुशलमस्य मद्वार्तां च देव्यै रहो निवेद्य पुनः 'कुमारः शार्दूलभक्षित' इति प्रकाशमाक्रोशनं कार्यम्। स दुर्मतिरन्तःप्रीतो वहिर्दुःखं दर्शयन्देवीमनुनेष्यति। पुनस्तया त्वन्मुखेन स वाच्यः—'यदपेक्षया त्वन्मतम्[99]त्यक्रमिषं सोऽपि बालः पापेन मे परलोकमगात्। अद्य तु त्वदादेशकारिण्येवाहम्' इति। स तथोक्तः प्रीतिं प्रतिपद्याभिपत्स्यति[100]। पुनरनेन वत्सनाभनाम्ना

---

३३. अथेति—जीर्णं वृद्धं नालीजङ्घम्। धूर्तः शठः। दुहितरि मञ्जुवादिन्याम्। सम्यक् प्रतिपत्त्या उचितेन व्यवहारेण। विश्वास्य प्रत्याप्य। तन्मुखेन तस्य विश्वासस्य मुखेन माध्यमेन। प्रत्याकृष्य निष्कास्य। प्रतिगत्य प्रतिनिवृत्य अस्य भास्करवर्मणः। मद्वार्तां मम समाचारम्। देव्यै वसुन्धरायै। रहः यथा स्यात् तथा; रहसि एकान्ते-निर्जने इति भावः। निवेद्य कथयित्वा। शार्दूलेन व्याघ्रेण भक्षितः खादितः। प्रकाशं सर्वश्राव्यं यथा स्यात् तथा। आक्रोशनम् आक्रन्दनं रोदनम्। दुर्मतिः शठः। अन्तः मनसि प्रीतः प्रसन्नः। अनुनेष्यति सान्त्वयिष्यति। वाच्यः संदेश्यः। यदपेक्षया यस्य कारणात्। त्वन्मतं तवाभिलापम्। अत्यक्रमिषम् उल्लंघितवती। पापेन दुरितेन। तव आदेशस्य आज्ञायाः कारिणी पालिका, त्वद्वशवर्तिनी। प्रतिपद्य-प्राप्य। अभिपत्स्यति उपागमिष्यति। महाविषेण तीव्रगरलेन। संनीय संमिश्र्य। मज्जयित्वा विषमिश्रितजलेन सुष्ठु क्लेदयित्वा।

---

९९. त्वदुक्तम्   १००. प्रत्यपत्स्यते

महाविषेण संनीय[101] तोयं तत्र मालां मज्जयित्वा तथा स वक्षसि मुखे च हन्तव्यः। 'स एवायमसिप्रहारः पापीयसस्तव भवतु यद्यस्मि पतिव्रता' इति। पुनरनेनागदेन संगमितेऽम्भसि तां मालां मज्जयित्वा स्वदुहित्रे देया। मृते तु तस्मिंस्तस्यां च निर्विकारायां सत्यां सतीत्येवैनां प्रकृतयोऽनुवर्तिष्यन्ते। पुनः प्रचण्डवर्मणे संदेश्यम्—'अनायकमिदं राज्यम्। अनेनैव सह वालिकेयं स्वीकर्त्तव्या' इति। तावदावां कापालिकवेषच्छन्नौ देव्यैव दीयमानभिक्षौ पुरो बहिरुपश्मशानं वत्स्यावः।

वक्षसि उरसि। मुखे हननात् मुखे विषं प्रवेक्ष्यति, स च मरिष्यति इत्याशयः। स एवायम् मालाप्रहारः। असेः कृपाणस्य प्रहारः आघातः। पापीयसः दुर्वृत्तस्य—दुराचारस्य। अगदेन औषधेन। संगमिते मिश्रिते। अम्भसि जले। निर्विकारायां विकारहीनायाम् अमृतायां; जीवन्त्यामित्यर्थः। सतीति—सती पतिव्रता। एनां वसुन्धराम्। प्रकृतयः प्रजाः। अनुवर्तिष्यन्ते अनुगमिष्यन्ति। सन्देश्यं सन्देशः प्रेषणीयः। अनायकं शासकहीनम्। अनेन राज्येन। वालिकेयं मञ्जुवादिनी। स्वीकर्त्तव्या परिणेया इति भावः। आवां विश्रुतभास्करवर्माणौ। कापालिकः शैवः व्रतिविशेषः; तस्य वेषेण परिच्छदेन छन्नौ गूढौ; तिरोहितयथार्थस्वरूपौ इति यावत्; कापालिकरूपधारिणौ इत्यर्थः। देव्या एव नान्येन केनचित्। दीयमाना वितीर्यमाणा भिक्षा दानं याभ्यां, तौ; भिक्षां लप्स्यमानौ इत्यर्थः। पुरः नगरात्। उपश्मशानं श्मशानस्य समीपे।

---

१०१. संमील्य

३४. पुनरा[१०२]र्यप्रायान् पौरवृद्धानाप्तांश्च मन्त्रिवृद्धानेकान्ते अब्रवीत् देवी—'स्वप्नेऽद्य मे देव्या विन्ध्यवासिन्या कृतः प्रसादः। अद्य चतुर्थेऽहनि प्रचण्डवर्मा मरिष्यति। पञ्चमेऽहनि रेवातटवर्तिनि मद्भवने परीक्ष्य वैजन्यं जनेषु निर्गतेषु कपाटमुद्घाट्य त्वत्सुतेन सह कोऽपि द्विजकुमारो निर्यास्यति। स राज्यमिदमनुपाल्य बालं ते प्रतिष्ठापयिष्यति। स खलु बालो मया व्याघ्रीरूपया तिरस्कृत्य स्थापितः। सा चेयं वत्सा मञ्जुवादिनी तस्य द्विजातिदारकस्य दारत्वेनैव कल्पिता' इति। तदेतदतिरहस्यं युष्मास्वेव गुप्तं तिष्ठतु यावदेतदुपपत्स्यते" इति।

---

३४. पुनरिति—पुनः तदा। आर्यप्रायान् साधुचरितभूयिष्ठान्; श्रेष्ठान् इत्यर्थः। पौराश्च ते वृद्धाश्च; मान्यान् पौरान् इत्याशयः। एकान्ते रहसि। कृतः प्रसादः अनुग्रहः; वरो दत्तः इत्यर्थः। अद्य अस्मात् दिनात्। अहनि दिवसे। रेवायाः तटे कूले वर्तिनि स्थिते। मद्भवने मम मन्दिरे। वैजन्यं— विगताः जनाः यस्मात्, तत् विजनं, तस्य भावः; निर्जनत्वं— शून्यत्वमिति भावः। निर्गतेषु निष्क्रान्तेषु। उद्घाट्य अपावृत्य। त्वत्सुतेन तव पुत्रेण। द्विजकुमारः ब्राह्मणयुवा क्षत्रिययुवा वा वैश्यो युवा वा; ब्राह्मणक्षत्रियवैश्या द्विजा उच्यन्ते। निर्यास्यति निर्गमिष्यति—आविर्भविष्यति। स बालः भास्करवर्मा। मया विन्ध्यवासिन्या देव्या। व्याघ्रीरूपया शार्दूल्याः आकृतिं धारयित्वा इत्यर्थः। तिरस्कृत्य आच्छाद्य, अभिभूय वा। स्थापितः रक्षितः। दारत्वेन पत्नीत्वेन। कल्पिता निश्चिता। तयोर्विवाहः करणीयः इत्याशयः। अतिरहस्यं परमगोपनीयं तथ्यम्। युष्मासु श्रोतृषु भवत्सु

---

१०२. पुनराकार्यार्यप्रायान्

[वसुन्धरायाः प्रभावप्रसिद्धिः]

३५. स सांप्रतमतिप्रीत[103] प्रयातोऽर्थश्चायं यथाचिन्तितमनुष्ठितोऽभूत्। प्रतिदिशं च लोकवादः प्रासर्पत् 'अहो माहात्म्यं पतिव्रतानाम् । असिप्रहार एव हि स मालाप्रहारस्तस्मिञ्जातः[104]। न शक्यमुपधियुक्तमेतत्कर्मेति वक्तुं यतस्तदेव दत्तं दाम दुहित्रे स्तनमण्डनमेव तस्यै जातं न मृत्युः। योऽस्याः पतिव्रतायाः शासनमतिवर्तते स भस्मैव भवेत्' इति।

३६. अथ महाव्रतिवेषेण मां च पुत्रं च भिक्षायै प्रविष्टौ

इह उपस्थितेषु पौरेषु मन्त्रिषु च। गुप्तं रक्षितमप्रकाशितम्। उपपत्स्यते घटिष्यते। यावदिदं सर्वं कार्यं दृष्टिपथं न आयाति तावत् स्वप्नवृत्तमिदं सुगुप्तं तिष्ठतु; अन्यस्मै कस्मैचिद् नाख्येयमिति भावः।

३५. स इति—स नालीजंघः। साम्प्रतम् इदानीम्। अतिप्रीतः परम-हर्षाप्लुतः। प्रयातः अगच्छत्। अर्थः कार्यम्। यथाचिन्तितं चिन्तितं क्रमं चिन्तितां वा योजनामनुसृत्य अनतिक्रम्य वा। अनुष्ठितः सम्पादितः। प्रतिदिशं दिशि दिशि—सर्वासु दिक्षु। लोकवादः जनानां विचारः विश्वासपूर्णं कथनं वा। प्रासर्पत् प्रथितः अभवत्। माहात्म्यं गौरवं, प्रभावः। तस्मिन् मित्रवर्मणि। उपधियुक्तं कपटपूर्णम्। दाम माला। दुहित्रे मञ्जुवादिन्यै। स्तनयोः कुचयोः मण्डनम् आभूषणम्। शासनम् आदेशम्। अतिवर्तते उल्लंघेत्। भस्म एव स्यात् दग्धः भवेत्।

३५. अथ महेति—महान् व्रती कापालिकः, तस्य वेषेण परिच्छदेन। प्रविष्टौ राजप्रासादे आगतौ। प्रस्नुतस्तनी प्रस्नुतौ पयः-

---

१०३. सांप्रतमित्यतिप्रीतः प्रायात्। अर्थं०।

१०४, वाक्यमिदं नास्ति क्वचित्।

दृष्ट्वा प्रस्नुतस्तनी प्रत्युत्थाय हर्षाकुलं[105] मब्रवीत्—'भगवन् अयमञ्जलिः। अनाथोऽयं जनोऽनुगृह्यताम्। अस्ति ममैकः स्वप्नः। स किं सत्यो न वा' इति। मयोक्तम्—'फलमस्याद्य व द्रक्ष्यसि' इति। 'यद्य वं वहुभागधेयमस्या वो दास्याः। स खल्वस्याः सानाथ्यशंसी स्वप्नः' इति मद्दर्शनराग[106] वद्ध-साध्वसां मञ्जुवादिनीं प्रणमय्य, भूयोऽपि सा हर्षगर्भमब्रूत—'तच्चेन्मिथ्या सोऽयं युष्मदीयो बालकपाली[107] श्वो मया

प्रसारयुक्तौ स्तनौ कुचौ यस्याः सा; स्रवत्पयोधरा इत्यर्थः। प्रत्युत्थाय सत्काराय उद्गत्य। हर्षेण आनन्देन आकुलं व्याकुलं यथा स्यात् तथा; आनन्दनिर्भरं सोल्लासं वा। अञ्जलिः शिरसि हस्तयोः वन्धनम्। अनाथः विशरणः। अनुगृह्यतां दयनीयः। सत्यः यथार्थः। अद्य व अस्मिन्नेव दिवसे। द्रक्ष्यसि साक्षात्करिष्यसि। एवं स स्वप्नः सत्यः भवति। वहु भागधेयं परमं सौभाग्यम्। दास्याः सेविकायाः। अस्याः मञ्जुवादिन्याः। सानाथ्यशंसी—नाथेन सहितः सनाथः, तस्य भावः सानाथ्यम्; तत् शंसते असौ; अस्याः मत्पुत्र्याः भवान् पतिः भविष्यति इति सूचयति इति भावः। मद्दर्शनेति—मम दर्शनमवलोकनं; तस्मात् संजातः रागः अनुरागः, तेन वद्धं धारितं साध्वसं लज्जाभावः यया सा, ताम्; अनुरागवतीं, लज्जायुतां चेति भावः। प्रणमय्य अभिवाद्य। भूयः अपि पुनरपि। हर्षगर्भं हर्षः गर्भे यस्य, तत् यथा स्यात् तथा। अब्रूत कथितवती। तत् स स्वप्नः; तव वचनम् इत्यर्थः। मिथ्या अनृतं निष्फलमिति भावः। युष्मदीयः भावत्कः। बालः च असौ कपाली, शैवव्रती इति भावः। श्वः आगामिनि दिवसे। निरोद्धव्यः गृहीत्वा अत्र वन्धनीयः। स्मितम् ईषद् हसितं, तेन सह इति सस्मितम्।

---

१०५. हर्षकलम्　　१०६. वद्धराग　　१०७. वालः

निरोद्धव्य' इति। मयापि सस्मितं मञ्जुवादिनीरागलीनदृष्टिलीढधैर्येणाभिहितम्-'एवमस्तु' इति। लब्धभैक्षो[१०८] नालीजङ्घमाकार्य निर्गम्य ततश्च तं चानुयान्तं शनैरपृच्छम्—'क्वासावल्पायुः प्रथितः प्रचण्डवर्मा, इति। सोऽब्रूत-'राज्यमिदं ममेत्यपास्तशङ्को [१०९]राजास्थानमण्डप एव तिष्ठत्युपास्यमानः कुशीलवैः' इति।

[प्रचण्डवर्मणो वधः]

३७. यद्येवमुद्याने तिष्ठ' इति तं जरन्तमादिश्य तत्प्राकारैकपार्श्वे क्वचिच्छून्यमठिकायां मात्राः समवतार्य तद्रक्षणनियुक्त-

---

मञ्जुवादिनीति—मञ्जुवादिन्याः रागे अनुरागे लीना निक्षिप्ता या दृष्टिः चक्षुः; चक्षुर्व्यापार इति वा; तया लीढं नष्टं धैर्यं प्रकृतिभावः यस्य सः। अभिहितं कथितम्। लब्धं प्राप्तं भैक्षं भिक्षादानं येन सः; अहं विश्रुतः। आकार्य आहूय। निर्गम्य वहिः एत्य ततः तस्मात् स्थानात्। अनुयान्तं मत्पश्चाद् आगच्छन्तम्। अल्पम् एतद्दिनमात्रम् आयुः जीवनं यस्य सः; अद्य यमसदनं गन्तास्तीति भावः। प्रथितः अद्य मरिष्यतीति प्रसिद्धः। अपास्ता नष्टा शंका सन्देहः यस्य सः; निःशङ्कः—निर्भयः इति भावः। राजास्थानमण्डपे राजसभाभवने। उपास्यमानः सेव्यमानः। कुशीलवैः गायकैः। गायकाः तस्य विनोदं कुर्वन्ति, स तत्र रममाणः सभायां वर्तते इति भावः।

३७. यद्येवमिति—उद्याने उपवने। जरन्तं वृद्धं नालीजङ्घम्। आदिश्य आज्ञाप्य। तस्य राजप्रासादोद्यानस्य प्राकारस्य प्राचीरस्य एकस्मिन् पार्श्वे भागे इति तत्प्राकारैकपार्श्वे। शून्या निर्जना परित्यक्ता वा असौ मठिका क्षुद्रः मठः, तस्याम्। मात्राः परिच्छदादीन्। समवतार्य

---

१०८. लब्धभैक्ष्यः १०९. राजस्थान०

राजपुत्रः कृतकुशीलववेषलीलः प्रचण्डवर्माणमेत्यान्वरञ्जयम्। अनुरञ्जितातपे तु समये जन[110]समाजज्ञानोपयोगीनि संहृत्य नृत्यगीतनानारुदितानि[111], हस्तचंक्रमणमूर्ध्वपादालातपादापीड-वृश्चिकमकरलङ्घनादीनि मत्स्योद्वर्तनादीनि च करणानि, पुनरादा–

अपनीय। तासां मात्राणां परिच्छदादीनां रक्षणे पर्यवेक्षणे नियुक्तः व्यापारितः राजपुत्रः भास्करवर्मा येन सः; कापालिकवेषसाधनभूतवस्त्रादीनि रक्ष इति राजपुत्रमादिश्य इत्याशयः। कृताः धारिताः कुशीलवानां गायकानां वेषः परिच्छदः लीलाः चेष्टाः च येन सः; कुशीलवरूपं धारयित्वा इति भावः। एत्य राजास्थानमण्डपे गत्वा। अन्वरञ्जयम् व्यनोदयम्। अनुरञ्जितः रक्तिमानं प्राप्तः आतपः सूर्यप्रकाशः यस्मिन्, तस्मिन्; सन्ध्यासमये इत्यर्थः। **जनेति**—जनानां समाजस्य तत्रागतमनुष्यसमुदायस्य ज्ञानाय उपयोगीनि लाभकराणि; ज्ञानवर्धनानि इति भावः। संहृत्य अभिनीय। नृत्यं नर्तनं गीतं गानं नानारुदितानि अनेकविधरोदनस्वरानुकरणानि, तानि। हस्तयोः पाण्योः चङ्क्रमणम् इतस्ततः भ्रमणं प्रसारणं वा। **ऊर्ध्वेति**—ऊर्ध्वपादम् अलातपादमिति नृत्यभेदौ। यथा चाह भरतः—

"कराभ्यामवनीं स्पृष्ट्वा मूर्धानं भ्रामयेन्मुहुः।
उत्तानीकृत्य चरणावूर्ध्वपादं तदुच्यते॥
उद्धृत्यैकं तु चरणमन्यं कृत्वैव कुञ्चितम्।
नृत्यत्यनुमतं तिर्यक्तदालातकमेव च॥"

आपीडः किरीटः, तद्वत्, तं धृत्वा वा नर्तनम्। वृश्चिकलङ्घनं द्रुणावत् भ्रमणम्। मकरलंघनं नक्रवत् गमनम्। मत्स्योद्वर्तनानि मीनवत विलसितानि। करणानि तालप्रदानानि। आदाय आदाय पुनः पुनः गृहीत्वा; विश्वाससंस्थापनायैव स एवं करोति; तद्द्योतिका द्विरुक्तिरियम्।

---

११०. समाजोप०   १११. रुदितादिनि

यादाय आसन्नवर्तिनां क्षुरिकास्ताभिरुपहितवर्म्मा[११२]चित्रदुष्कराणि करणानि श्येनपातोत्क्रोशपातादीनि दर्शयन् विंशतिचापान्तराला-वस्थितस्य प्रचण्डवर्मणश्छुरिकयैकया प्रत्युरसं प्रहृत्य'जीव्याद्[११३] वर्षसहस्रं वसन्तभानुः' इत्यभिगर्जन् मद्गात्रमुत्कर्तु[११४]मुद्यतासेः कस्यापि चारभटस्य पीवरांसबाहुशिखरमाक्रम्य तावतैव तं

आसन्नवर्तिनां समीपस्थितानां जनानाम्। क्षुरिकाः शस्त्रिकाः। उपहित-वर्म्मा उपहितं युक्तं वर्म्म शरीरं यस्य सः। 'आच्छिन्नशरीरः' इति भूषणा। चित्राणि विलक्षणानि च तानि दुष्कराणि दुरभिनेयानि इति चित्रदुष्कराणि करणानि क्रियाः। **श्येनेति**—श्येनपातः श्येनवत् पतनम्—

"परिक्रम्यान्तरिक्षेण संप्राप्योच्चैरदृश्यताम्।
आकस्मिकाभिपातेन श्येनपात इतीरितः॥"

उत्क्रोशपातः कुररवत् पतनम्। **विंशतीति**—चापः प्रसारित-बाहुद्वयप्रमाणं भवति। विंशतिः चापाः अशीतिहस्तप्रमाणम्; तावत्प्रमाणे अन्तराले प्रदेशे; तावद्दूरमिति भावः; तत्र अवस्थितस्य उपविष्टस्य। उरसि इति प्रत्युरसम्—वक्षसि। प्रहृत्य आघातं कृत्वा। **जीव्यादिति**—वाक्यमिदं वसन्तभानुनयदुष्कृतमेत , न काचिदत्र विश्रुतस्योपधिरिति सामाजिकानां, ततश्च प्रजानां मनसि पातयितुम् उक्तम्। यथा लोके सम्प्रति जयकारः क्रियते तथैव वाक्यमिदं वसन्तभानोर्नयस्य विजयं घोषयति। **इतीति**—अभिगर्जन् उच्चस्वरेण घोषयन्। मद्गात्रं मम देहम्। उत्कर्तुं खण्डयितुम्। उद्यतासेः उद्यतः ऊर्ध्वमुत्थापितः कृतः वा असिः कृपाणः येन सः, तस्य। चारभटस्य चारः कुशीलवः च असौ भटः योधः च इति; तस्य वीरकुशीलवस्येति भावः; अथवा चारः गुप्तचरः चासौ भटः; गूढपुरुषः इति यावत्, तस्य। पीवरौ पीनौ अंसौ स्कन्धौ

---

११२. उपहित   ११३. जीयात्   ११४. अल्कर्तुं; प्रहर्तुम्

विचेतीकुर्वन्नाकुलं च लोकमुच्चक्षूकूर्वन् द्विपुरुषोच्छ्रितं प्राकार-मत्यलङ्घयम् ।

३८. अवप्लुत्य चोपवने मदनुपातिनामेष पन्था दृश्यते' इति ब्रुवाण एव नालीजङ्घसमीकृतसैकतास्पष्ट[115]पादन्यासया तमालवीथ्या चानुप्राकारं प्राचा प्रतिप्रधावित. पुनरवाचोच्चितेष्टक चितत्वादलक्ष्यपातेन[116] प्रद्रुत्य लङ्घितप्राकारवप्रखातवलय-

---

ययोः, तौ बाहू भुजौ तयोः शिखरं शृंगम्; स्कन्धयोः इति भावः । आक्रम्य उत्पत्य । तावता उत्पतनेनैव । विचेतीकुर्वन् विसंज्ञं सम्पादयन् । आकुलं व्याकुलम् । उच्चक्षूकुर्वन् ऊर्ध्वम् उपरि कृतं चक्षुः येन स उच्चक्षुः; न उच्चक्षुषम् उच्चक्षुषं कुर्वन् उच्चक्षूकुर्वन्; ऊर्ध्वं पश्यन्ति यथा तथा कुर्वन् इत्यर्थः । द्विपुरुषोच्छ्रितं पुरुषद्वयप्रमाणोच्चम् । अत्यलंघयम् अतरम् ।

३८. अवप्लुत्येति—अवप्लुत्य वेगेन कूर्दित्वा । मदनुपातिनां मम पृष्ठतः आगच्छताम् । एष पन्थाः मदागमनमार्गः । नालीति—नालीजंघेन समीकृतेन परिमार्जितेन सैकतेन वालुकाप्रदेशेन अस्पष्टः अलक्षितः पादन्यासः चरणसन्निवेशः यस्यां सा, तया । तमालवीथ्या तमालवृक्षाणां पङ्क्त्या । प्राकारेण प्राकारस्य समीपं प्राकार-मनुसृत्य इति वा अनुप्राकारम्; प्राचीरप्रदेशेन इति यावत् । प्राचा पूर्वस्यां दिशि । प्रतिधावितः वेगेन प्रद्रुत्य । अवाचा दक्षिणतः । उच्चितेष्टक-चितत्वात् उच्चं चितैः संश्लिष्टैः इष्टकैः चितः युक्तः, तस्य भावः, तस्मात् उच्चसंश्लिष्टेष्टकयुक्तत्वात् । "अवाचोच्चितेष्टका उच्चनीच-वद्धेष्टकाः" इति पदचन्द्रिका । राशीकृतेष्टकाव्याप्तत्वादिति बाल-बोधिनी । अलक्ष्यः अदृश्यः पातः गमनं, तेन । प्रद्रुत्य धावित्वा । लंघितः तोरणः प्राकारवप्रस्य प्राचीरस्य यत् प्रखातं परिखा तस्य वलयः येन सः ।

---

११५. ०स्पृष्ट

११६. पादेन

स्तस्यां शून्यमठिकायां तूर्णमेव प्रविश्य प्रतिमुक्तपूर्ववेषः सह कुमारेण मत्कर्मतुमुल[११७] राजद्वारि[११८]दुःखलब्धवर्त्मा श्मशानोद्देशमभ्यगाम् ।

३९. प्रागेव तस्मिन् दुर्गागृहे प्रतिमाधिष्ठान एव मया कृतं भग्नपार्श्वस्थैर्यस्थूलप्रस्तरस्थगितबाह्यद्वारं बिलम् ।

(कुमारेण सह विश्रुतस्याविर्भावः)

४०. अथ गलति मध्यरात्रे वर्षवरोपनीतमहार्हरत्नभूषणपट्टनिवसनौ तद् बिलमावां प्रविश्य तूष्णीमतिष्ठाव । देवी तु पूर्वे-

---

तूर्णं क्षिप्रम् । प्रतिमुक्तः गृहीतः पूर्वः वेषः कापालिकपरिच्छदः येन सः; पूर्ववत् कापालिकरूपी भूत इत्यर्थः । मम कर्मणा प्रचण्डवर्मवधकार्येण तुमुले व्याकुलरवयुक्ते राजद्वारि प्रासादात् निर्गमनमार्गे । दुःखेन कष्टेन लब्धं प्राप्तं वर्त्म निर्गमनमार्गः येन सः । श्मशानस्य मृतशरीरदाहप्रदेशस्य उद्देशं स्थानम् ।

३९. प्रागिति—प्राक् आगामिदिवसकर्मणः पूर्वम् । दुर्गागृहे दुर्गायाः मन्दिरे । प्रतिमाधिष्ठाने प्रतिमाधारे । कृतं सम्पादितम् । भग्नेति—भग्नं नष्टं पार्श्वयोः स्थैर्यं दाढर्यं यस्य, तथाविधेन स्थूलप्रस्तरेण गुरुपाषाणेन स्थगितम् आच्छादितं बाह्यद्वारं यस्य तत् । बिलं छिद्रम् ।

४०. अथेति—गलति गच्छति । रात्रेः शर्वर्याः मध्यभागे इति मध्यरात्रे । वर्षवरैः षण्ढैः उपनीतानि उपाहृतानि महार्हाणि बहुमूल्यानि रत्नभूषणानि रत्नाभरणानि पट्टनिवसनानि कौशेयवस्त्राणि च ययोः, तौ । आवां विश्रुतभास्करवर्माणौ । तूष्णीं मौनम् । पूर्वेद्युः पूर्वस्मिन्

---

११७. तुमुले　　११८. राजद्वारदुःख०

द्यु रेव यथार्हमग्निसंस्कारं मालवाय दत्त्वा[११९] प्रचण्डवर्मणे, चण्डवर्मणे च तामवस्थामश्मकेन्द्रोपधिकृतामेव संदिश्य, उत्तरेद्यु: प्रत्युषस्येव पूर्वसंकेतितपौरामात्यसामन्तवृद्धै: सहाभ्येत्य, भगवतीमर्चयित्वा, सर्वजनप्रत्यक्षं परीक्षितकुक्षिवैजन्यं तद्भवनं विधाय, दत्तदृष्टि:[१२०] सह जनेन स्थित्वा, पटीयांसं पटहशब्दमकारयत् ।

४१. अणुतररन्ध्रप्रविष्टेन तेन नादेनाहं दत्तसंज्ञः शिरसैवोत्क्षिप्य सप्रतिमं लोहपादपीठमंसलपुरुषप्रयत्नदुश्चलमु-

---

दिवसे । अर्हम् योग्यम् अनतिक्रम्य यथार्हम् । अग्निसंस्कारम् दाहकर्म; अन्त्येष्टिसंस्कारं सम्पाद्य इति भावः । मालवाय प्रचण्डकर्मणे । **अश्मकेति**—अश्मकेन्द्रस्य वसन्तभानोः उपधिः कपटः—कूटनीतिः, तेन कृतां जनितां सम्पादितां वा । उषसि इति प्रत्युषसि, प्रात:काले सूर्योदयात्प्राक् इत्यर्थः । पूर्वं संकेतिताः विज्ञापिताः नियताः वा, तैः । भगवतीं दुर्गां विन्ध्यवासिनीं देवीम् । सर्वजनानां प्रत्यक्षं सर्वेषां समक्षं, सर्वे अपश्यन् यथा तथा । परीक्षितं सम्यक् निरूपितं कुक्षेः दुर्गामन्दिरस्य अभ्यन्तरप्रदेशस्य वैजन्यं निर्जनता यस्य तत् । तद्भवनं दुर्गामन्दिरम् । दत्ता स्थापिता दृष्टिः यया सा । पटीयांसं तीव्रतरम् ।

४१. **अण्विति**—अणुतरेण सूक्ष्मेण रन्ध्रेण छिद्रेण प्रविष्टः अन्तः गतः, तेन । नादेन पटहशब्देन । दत्ता प्राप्ता संज्ञा संकेतः यस्मै सः । उत्क्षिप्य उत्पाट्य उत्थाप्य वा । प्रतिमया मूर्त्या सहितम् । लोहस्य कृष्णायसः पादपीठं पादासनम् । **अंसलेति**—अंसलः बलवान् पुरुषः नरः तस्य प्रयत्नेन प्रयासेन दुश्चलं दुःखेन चालयितुं शक्यम्

---

११९. दाययित्वा

१२०. दृष्टिरेव

भयकरविवृतैक[121] पार्श्वमेकतो निवेश्य निरगमम् । निरगमयं च कुमारम् ।

[विश्रुतस्य प्रकृतिभिरभिभाषणम्]

४२. अथ [122]यथापूर्वमर्पयित्वा[123] दुर्गामुद्घाटितकपाटः प्रत्यक्षीभूय प्रत्ययहृष्टदृष्टि[124] स्पष्टरोमाञ्चमुद्यताञ्जलि रूढविस्मयं च प्रणि[125] पतन्तीः प्रकृतीरभ्यधाम् ।

४३. 'इत्थं देवी विन्ध्यवासिनी मन्मुखेन युष्मानाज्ञापयति- 'स एष राजसूनुरापन्नो[126] मया सकृपया शार्दूलरूपेण

उभाभ्यां कराभ्यां हस्ताभ्यां विवृतौ पार्श्वौ यस्य तत् । निवेश्य स्थापयित्वा । निरगमं बहिर् आगच्छम् । निरगमयं निष्कामितवान् । कुमारं भास्करवर्माणम् ।

४२. अथेति—अथ तदनन्तरम् । यथापूर्वं पूर्वावस्थानुसारम् । अर्पयित्वा स्थापयित्वा । उद्घाटितौ अपावृतौ कपाटौ द्वारौ येन सः । प्रत्यक्षीभूय सर्वेषां समक्षमागत्य । प्रत्ययाद् विश्वासात् हृष्टा परमप्रीता दृष्टिः दर्शनं यस्मिन् तद् यथा स्यात् तथा । स्पष्टाः सुलक्षिताः संजाताः वा रोमाञ्चाः यस्मिन् तद् यथा स्यात् तथा । उद्यतः शिरसि समानीतः अञ्जलिः हस्तपुटः यस्मिन्, तद् यथा स्यात् तथा । रूढः संजातः विस्मयः आश्चर्यं यस्मिन्, तद्यथा स्यात् तथा । प्रणिपतन्तीः अभिवादयन्तीः । प्रकृतीः प्रजाः । अभ्यधाम् अकथयम् ।

४३. इत्थमिति—विश्रुतः देव्याः विन्ध्यवासिन्याः कल्पितं सन्देशं श्रावयति—इत्थम् एवम् । मन्मुखेन मद्वचनेन । आपन्नः आपद्गतः;

---

१२१. विवृतपार्श्वम् १२२. यथापुरम् १२३. मर्चयित्वा
१२४. प्रत्ययहृष्टदृष्टीः १२५. प्रति०
१२६. 'स एष राजसूनुरापन्नो' इति नास्ति

तिरस्कृत्याद्य वो दत्तः[१२७]। तमेनमद्यप्रभृति मत्पुत्रतया[१२८]—ऽमन्दमातृपक्ष इति परिगृह्णन्तु भवन्तः'। अपि च दुर्घटकूटकोटिघटनापाटवप्रकटशाठ्यनिष्ठुराश्मकघटघट्टनात्मानं मां मन्यध्वमस्य रक्षितारम्। रक्षानिर्वेशश्चास्य स्वसेयं सुभ्रूरभ्यनुज्ञाता मह्यमार्यया' इति।

(मञ्जुवादिन्याः पाणिग्रहणम्)

४४. श्रुत्वैतत् 'अहो भाग्यवान् भोजवंशो यस्य त्वमार्या-

प्राणसंकटे पतितः इति यावत्। सकृपया अनुग्रहं प्रदर्श्य इति भावः। शार्दूलरूपेण व्याघ्रस्य आकृतिं प्रधार्य। तिरस्कृत्य आच्छाद्य स्थापितः रक्षितः वा आसीत्। अद्य अस्मिन् दिने सम्प्रति वा। वः युष्मभ्यं प्रजादिभ्यः। दत्तः प्रत्यर्पितः। अद्यप्रभृति इतः अग्रे। मम पुत्रः सूनुः तस्य भावस्तया। अमन्दः अक्षीणः मातृपक्षः; यतः मातृपक्षे देवी विन्ध्यवासिनी स्वयं वर्तते; पितरि मृते माता एव पुत्रस्य संरक्षिका भवति। परिगृह्णन्तु स्वीकुर्वन्तु। दुर्घटेति—दुर्घटा दुष्करा या कूटकोटिः कूटानां कपटानां कोटिसंख्या, तस्याः घटानायां योजनायां पाटवेन नैपुण्येन प्रकटं प्रकाशितं यत् शाठ्यं धूर्तता, तेन निष्ठुरः क्रूरः, अश्मक एव घटः कुम्भः, तस्य घट्टनः नाशकः आत्मा यस्य, तम्। अहमेव वसन्तभानोः कूटनीतिं सम्यक् जानामि, तं च हनिष्यामि इति भावः। रक्षितारं त्रातारम्। रक्षायाः त्राणस्य निर्वेशः शुल्कः। सुभ्रूः शोभने भ्रुवौ यस्याः सा; सुन्दरी इत्यर्थः। अभ्यनुज्ञाता अनुमता; प्रतिश्रुता दत्ता वा इति भावः। आर्यया देव्या विन्ध्यवासिन्या दुर्गया।

४४. श्रुत्वेति—एतत्—विश्रुतस्य मुखेन दुर्गायाः सन्देशवचनम्। भाग्यवान् सौभाग्यशाली। आर्यया देव्या दत्तः कल्पितः इति

---

१२७. दत्तमेनमद्य   १२८. मत्पुत्रतया मन्द०

दत्तो नाथः' इत्यप्रीयन्त प्रकृतयः । सा तु वाचामगोचरां हर्षावस्थामस्पृशन्मे श्वश्रूः । तदहरेव च यथावदग्राहयन्मञ्जुवादिनीपाणिपल्लवम् ।

[भास्करवर्मणः प्रभावप्रसिद्धिरुन्नयनं च]

४५. प्रपन्नायां च यामिन्यां सम्यगेव विलं प्रत्यपूरयम् । अलब्धरन्ध्रश्च लोको नष्टमुष्टिचिन्तादिकथनैरभ्युपायान्तरप्रयुक्तैर्दिव्यांशतामेव मम समर्थयमानो [126]मदाज्ञां नात्यवर्तत ।

आर्यादत्तः । नाथः रक्षकः । अप्रीयन्त हर्षमग्नाः जाताः । वाचामगोचराम् अवर्णनीयाम्; परमाम्, अगाधामिति भावः । हर्षावस्थां प्रमोदम् । अस्पृशत प्राप्नोत । श्वश्रूः मञ्जुवादिन्याः माता वसुन्धरा । तद् अहः एव तस्मिन् एव दिने । यथावत्-विध्यनुसारम् । पाणिः हस्तः पल्लवमिव इति पाणिपल्लवम्, तत्; कोमलं सुन्दरं च हस्तमिति यावत् । आगामिनि दिवसे विघ्नः कोऽपि न आगच्छेत् इति भावनया दिवसस्य च अनुकूलतया आवयोः विवाहमकरोत् इति निष्कर्षः ।

४५. प्रपन्नेति—प्रपन्नायां समागतायाम् । यामिन्यां रात्री सम्यक् सुष्ठु, यथा अन्यः कोऽपि मम कपटं न जानीयात् । अत्यपू भरितवान् पिहितवान् वा । अलब्धं अप्राप्तं रन्ध्रं कपटकृत्यं मम नीतिमजानन् इत्यर्थः । नष्टेति—नष्टम् अदृश्यं जा मुष्टिः मुष्टिगतं वस्तु, चिन्ता चिन्तितं वस्त्वादि, तानि आदी येषां, तेषां कथनैः वाण्या यथावत् प्रकाशनैः । अन्ये अभ्युप इति अभ्युपायान्तराः, तैः प्रयुक्तैः व्यवहृतैः । दिव्यां अंशः भागः, तस्य भावः, ताम्; नाहं मानुषमात्रः विशिष्टः चापि इति भावः । समर्थयमानः प्रतिपा

---

१२६. त्वदाज्ञाम्

तिरस्कृत्याद्य वो दत्तः[१२७]। तमेनमद्यप्रभृति मत्पुत्रतया[१२८]—ऽमन्दमातृपक्ष इति परिगृह्णन्तु भवन्तः'। अपि च दुर्घटकूटकोटिघटनापाटवप्रकटशाठ्यनिष्ठुराश्मकघटघट्टनात्मानं मां मन्यध्वमस्य रक्षितारम्। रक्षानिर्वेशश्चास्य स्वसेयं सुभ्रूरभ्यनुज्ञाता मह्यमार्यया' इति।

(मञ्जुवादिन्याः पाणिग्रहणम्)

४४. श्रुत्वैतत् 'अहो भाग्यवान् भोजवंशो यस्य त्वमार्या-

प्राणसंकटे पतितः इति यावत्। सकृपया अनुग्रहं प्रदर्श्य इति भावः। शार्दूलरूपेण व्याघ्रस्य आकृतिं प्रधार्य। तिरस्कृत्य आच्छाद्य स्थापितः रक्षितः वा आसीत्। अद्य अस्मिन् दिने सम्प्रति वा। वः युष्मभ्यं प्रजादिभ्यः। दत्तः प्रत्यर्पितः। अद्यप्रभृति इतः अग्रे। मम पुत्रः सूनुः तस्य भावस्तया। अमन्दः अक्षीणः मातृपक्षः; यतः मातृपक्षे देवी विन्ध्यवासिनी स्वयं वर्तते; पितरि मृते माता एव पुत्रस्य संरक्षिका भवति। परिगृह्णन्तु स्वीकुर्वन्तु। दुर्घटेति—दुर्घटा दुष्करा या कूटकोटिः कूटानां कपटानां कोटिसंख्या, तस्याः घटानायां योजनायां पाटवेन नैपुण्येन प्रकटं प्रकाशितं यत् शाठ्यं धूर्तता, तेन निष्ठुरः क्रूरः, अश्मक एव घटः कुम्भः, तस्य घट्टनः नाशकः आत्मा यस्य, तम्। अहमेव वसन्तभानोः कूटनीतिं सम्यक् जानामि, तं च हनिष्यामि इति भावः। रक्षितारं त्रातारम्। रक्षायाः त्राणस्य निर्वेशः शुल्कः। सुभ्रूः शोभने भ्रुवौ यस्याः सा; सुन्दरी इत्यर्थः। अभ्यनुज्ञाता अनुमता; प्रतिश्रुता दत्ता वा इति भावः। आर्यया देव्या विन्ध्यवासिन्या दुर्गया।

४४. श्रुत्वेति—एतत्—विश्रुतस्य मुखेन दुर्गायाः सन्देशवचनम्। भाग्यवान् सौभाग्यशाली। आर्यया देव्या दत्तः कल्पितः इति

---

१२७. दत्तमेनमद्य   १२८. मत्पुत्रतया मन्द०

दत्तो नाथः' इत्यप्रीयन्त प्रकृतयः । सा तु वाचामगोचरां हर्षावस्थामस्पृशन्मे श्वश्रूः । तदहरेव च यथावदग्राहयन्मञ्जुवादिनीपाणिपल्लवम् ।

[भास्करवर्मणः प्रभावप्रसिद्धिरुपनयनं च]

४५. प्रपन्नायां च यामिन्यां सम्यगेव विलं प्रत्यपूरयम् । अलब्धरन्ध्रश्च लोको नष्टमुष्टिचिन्तादिकथनैरभ्युपायान्तरप्रयुक्तैर्दिव्यांशतामेव मम समर्थयमानो [१२६] मदाज्ञां नात्यवर्तत ।

आर्यादत्तः । नाथः रक्षकः । अप्रीयन्त हर्षमग्नाः जाताः । वाचामगोचराम् अवर्णनीयाम्; परमाम्, अगाधामिति भावः । हर्षावस्थां प्रमोदम् । अस्पृशत् प्राप्नोत् । श्वश्रूः मञ्जुवादिन्याः माता वसुन्धरा । तद् अहः एव तस्मिन् एव दिने । यथावत्–विध्यनुसारम् । पाणिः हस्तः पल्लवमिव इति पाणिपल्लवम्, तत्; कोमलं सुन्दरं च हस्तमिति यावत् । आगामिनि दिवसे विघ्नः कोऽपि न आगच्छेत् इति भावनया दिवसस्य च अनुकूलतया आवयोः विवाहमकरोत् इति निष्कर्षः ।

४५. प्रपन्नेति—प्रपन्नायां समागतायाम् । यामिन्यां रात्री सम्यक् सुष्ठु, यथा अन्यः कोऽपि मम कपटं न जानीयात् । प्रत्यपू भरितवान् पिहितवान् वा । अलब्धं अप्राप्तं रन्ध्रं कपटकृत्यं रे मम नीतिमजानन् इत्यर्थः । नष्टेति—नष्टम् अदृश्यं जा मुष्टिः मुष्टिगतं वस्तु, चिन्ता चिन्तितं वस्त्वादि, तानि आदौ येषां, तेषां कथनैः वाण्या यथावत् प्रकाशनैः । अन्ये अभ्युप इति अभ्युपायान्तराः, तैः प्रयुक्तैः व्यवहृतैः । दिव्यांश अंशः भागः, तस्य भावः, ताम्; नाहं मानुषमात्रः विशिष्टः चापि इति भावः । समर्थयमानः प्रतिपा

---

१२६. त्वदाज्ञाम्

न
याः
तां वि
, दिव्यां
यन् ।

राजपुत्रस्यार्यापुत्र इति प्रभावहेतुः[130]प्रसिद्धिरासीत् । तं च गुणवत्यहनि भद्राकृतमुपनाय्य पुरोहितेन पाठयन्नीतिं राजकार्याण्यन्वतिष्ठम् ।

[विश्रुतस्य विमर्शः—नयवनस्पतिवर्णनम्]

४६. अचिन्तयं च—'राज्यं नाम शक्तित्रयायत्तं, शक्तयश्च मन्त्रप्रभावोत्साहाः परस्परानुगृहीताः कृत्येषु क्रमन्ते । मन्त्रेण हि विनिश्चयोऽर्थानां, प्रभावेण प्रारम्भः, उत्साहेन निर्वहणम् । अतः

आदेशम् । अत्यवर्तत उल्लंघितवान् । आर्यायाः देव्याः पुत्रः । प्रभावहेतुः उत्कर्षकारणम् । प्रसिद्धिः ख्यातिः । तं भास्करवर्माणम् । गुणवति शुभे; शुभनक्षत्रादियुक्ते भद्रादिभिः रहिते ज्योतिषशास्त्रानुमोदिते दिवसे इत्याशयः । भद्राकृतं कृतक्षौरकर्माणम्, मुण्डितं—नापितेन कृत्तकेशमित्यर्थः; दीक्षायाः पूर्वं क्षौरकर्म अनिवार्यम् । 'भद्राकृतं कृतकल्याणश्मश्रुम्' इति पदचन्द्रिका । उपनाय्य उपनयनसंस्कारं कारयित्वा । नीतिं दण्डनीतिम् । अन्वतिष्ठं समपादयम् ।

४६. अचिन्तयमिति—अचिन्तयम् अहं विमर्शमकरवम् । शक्तीनां सामर्थ्यानां त्रयम्, तस्मिन् आयत्तमधीनम्; शक्तित्रयेण स्थितमिति भावः । मन्त्रः अमात्यादिभिः सह मन्त्रणया जनिता शक्तिः; प्रभावः राज्ञः तेजसा उत्पन्ना शक्तिः; उत्साहः राज्ञः मनसः दृढतया कर्मप्रवृत्तितया च प्राप्ता शक्तिः; एताः तिस्रः शक्तयः राज्यं धारयन्ति । परस्परं मिथः अनुगृहीताः मिलिताः; सहप्रयुक्ताः परस्परं योगं कुर्वाणाः । कृत्येषु राजकर्मसु । क्रमन्ते वृद्धिं प्राप्नुवन्ति । विनिश्चयः निर्धारणम् । अर्थानां कर्त्तव्याकर्त्तव्यकर्मणाम् प्रारम्भः कर्त्तव्यकर्मसु प्रवर्तनम् । निर्वहणं

---

१३०. ०हेतुप्रसिद्धिः

पञ्चाङ्गमन्त्रमूलो द्विरूपप्रभावस्कन्धश्चतुर्गुणोत्साहविटपो द्विसप्ततिप्रकृतिपत्रः षड्गुणकिसलयः शक्तिसिद्धिपुष्पफलश्च नयवनस्पतिर्नेतुरुपकरोति । स चायमनेकाधिकरणत्वादसहायेन

सिद्धिः, कार्यान्तस्य प्राप्तिः इति भावः । **पञ्चेति**—पञ्च सहायसाधनादीनि अङ्गानि यस्य सः, तथाविधः मन्त्रः एव मूलं यस्य सः । अत्र नयवृक्षस्य वर्णनं क्रियते । यथा वृक्षस्य स्थितिः मूलेन भवति, तथैव नीतिरपि पञ्चांगमन्त्रमाश्रितास्ति । पञ्चांगानामेतेषां वर्णनं कामन्दकीयनीत्यामेवं वर्तते—

"सहायाः साधनोपाया विभागो देशकालयोः ।
विपत्तेश्च प्रतीकारः सिद्धिः पञ्चाङ्गमुच्यते ॥"

द्विरूपेति—द्विरूपः द्विविधः प्रभावः तेजः एव स्कन्धः अंसः यस्य सः; धनसमृद्धिः पुरुषबाहुल्यं चैते द्वे प्रभावस्य कारणम्; अतः तस्य द्विरूपत्वम् अत्र प्रतिपादितम् । **चतुरिति**—चत्वारः गुणाः सामदानभेददण्डाख्या भेदाः यस्य स चतुर्गुणः । तादृशः उत्साह एव विटपाः शाखा यस्य सः । **द्विसप्ततीति**—द्विसप्ततिः प्रकृतयः एव पत्राणि यस्य सः । एतासां द्विसप्ततिप्रकृतीनां वर्णनं हिन्दीटिप्पणीषु द्रष्टव्यम् । षट् सन्धिविग्रहासनयानसंश्रयद्वैधीभावरूपाः गुणाः एव किसलयानि पल्लवानि यस्य सः । शक्तिः च सिद्धिः च, ते एव पुष्पफले यस्य सः; शक्तिः सामर्थ्यं नयवृक्षस्य पुष्पं, सिद्धिः साफल्यं च फलं स्तः इति भावः । नयः राजनीतिः एव वनस्पतिः वृक्षः, स नयवृक्षः । नेतुः नायकस्य, नयप्रयोक्तुः जयकामस्य राज्ञः इति भावः । उपकरोति लाभं प्रयच्छति, कर्माणि सुष्ठु सम्पाद्य सिद्धिं प्रयच्छति, सुखिनं च विदधाति । अनेकानि अधिकरणानि आधाराः प्रकाराः अवयवाः वा यस्य, तस्य भावः, तस्मात्; अयं विविधासु दिक्षु प्रसृतः अस्ति इति भावः । न विद्यते सहायः यस्य,

दुरुपजीव्यः[131]। यस्त्वयमार्यकेतुर्नाम मित्रवर्ममन्त्री, स कोसला-भिजनत्वात् कुमारमातृपक्षो मन्त्रिगुणैश्च युक्तः, तन्मतिमवमत्यैव ध्वस्तो मित्रवर्मा, स चेल्लब्धः पेशलम्' इति।

[आर्यकेतोरुपलब्धिः]

४७. अथ नालीजङ्घं रहस्यशिक्षयम्—'तात, आर्यमार्यकेतु-मेकान्ते ब्रूहि- 'को न्वेष मायापुरुषो य इमां † राजलक्ष्मीमनुभवति। स चायमस्मद्बालो भुजङ्गेनामुना परिगृहीतः। किमुद्-

---

तेन असहायेन साहाय्यरहितेन। दुरुपजीव्यः दुःखेन भोग्यः। **यस्त्विति**—कोसलाभिजनत्वात् कोसलवंशोत्पन्नत्वात्। कुमारस्य भास्करवर्मणः मातुः पक्षः पक्षस्थः। वसुन्धरा चापि कोसलवंशोत्पन्ना अस्ति, तस्यामस्य पक्ष-पातः स्वाभाविकः इत्याशयः। मन्त्रिणः सचिवस्य गुणाः दण्डनीतिकौश-लादयः, तैः। **तन्मतिमिति**—तस्य मतिम्। अवमत्य तिरस्कृत्य। विश्रुतेन इतः पूर्वम् मित्रवर्मकृतार्यकेतुतिरस्कारस्य उल्लेखः न कृतः। अस्मिन् विश्रुताख्याने तु वसुरक्षितोपदेशं प्रति एव अनन्तवर्मणः अवज्ञा वर्णि-तास्ति। ध्वस्तः नष्टः। पेशलं शोभनम्।

४७. **अथेति**—अथ ततः। रहसि उपांशु—एकान्ते। अशिक्षयं आर्यकेतुमुपगम्य कथं व्यवहर्तव्यमिति उपदिष्टवान्। एकान्ते रहसि। ब्रूहि कथय। **को न्विति**—नु खलु। मायापुरुषः। मायया छलादिना युक्तः पुरुषः, कपटी ऐन्द्रजालिकः इत्यर्थः। राजलक्ष्मीं राज्ञः श्रियम्। यतः अयम् मित्रवर्मराज्यमधितिष्ठति। अस्माकं बालः दारकः भास्कर-वर्मा; नालीजंघार्यकेत्वोः भास्करवर्ममातृपक्षत्वात् अस्मद्बालः इत्युक्तम्। भुजङ्गेन कुटिलेन, दुष्टेन; भुजं कुटिलं गच्छति इति भुजंगः। अमुना विश्रुतेन। परिगृहीतः आत्माधीनं स्थापितः। उद्गीर्येत वम्येत, त्यज्येत

---

१३१. ०जीवः † राज्य०

४८. सोऽन्यदैवं मामावेदयत्—"मुहुरुपास्य प्राभृतैः प्रवर्त्य चित्राः कथाः संवाह्य पाणिपादमतिविस्रम्भदत्तक्षणं तमप्राक्षं त्वदुपदिष्टेन नयेन । सोऽप्येवमकथयत्—'भद्र, मैवं वादीः । अभिजनस्य शुद्धिदर्शनमसाधारणं [१३२]बुद्धिनैपुण्यमतिमानुषं प्राणबलमपरिमाणमौदार्यमत्याश्चर्यमस्त्रकौशलमनल्पं शिल्पज्ञान-मनुग्रहार्द्रं चेतस्तेजश्चाप्यविषह्यमभ्यमित्रीणमित्यस्मिन्नेव संनि-

---

इति भावः । ग्रस्येत कवलोक्रियेत नाशं प्राप्येत इत्याशयः । बोध्यः ज्ञापनीयः ।

४८. स इति—अन्यदा अन्येद्युः । आवेदयत् निवेदितवान् । मुहुः वारम्वारम् । उपास्य सेवां विधाय । प्राभृतैः उपायनैः । प्रवर्त्य प्रारभ्य । चित्राः रुचिकराः । संवाह्य संपीड्य; सुखं मर्दयित्वा इत्यर्थः । **अतीति**—अतिविस्रम्भेण परमविश्वासेन दत्तः प्राप्तः क्षणः हर्षः येन तम्; विश्वासेन प्रीतमित्यर्थः । अप्राक्षम् अपृच्छम् । **अभिजनेति**—अभिजनस्य जन्मनः कुलस्य वा । शुद्धेः पवित्रतायाः अमिश्रणस्य वा दर्शनं दर्पणं; स्थितिरित्यभिप्रायः । असाधारणं विलक्षणम् अद्वितीयं महद् वा; निपुणस्य भावः नैपुण्यं, बुद्धेः मत्याः नैपुण्यं कौशलम्; चातुर्यमित्यर्थः । अतिमानुषम् अलौकिकम् । प्राणबलं सामर्थ्यम् । अपरिमाणम् अतुलनीयम् । औदार्यं दानशीलत्वं महानुभावत्वं वा । आश्चर्यमतिक्रम्य इति अत्याश्चर्यं परमविस्मयजनकम् । अस्त्रेषु बाणादिप्रक्षेप्यायुधेषु कौशलं प्रावीण्यम् । अनल्पं प्रभूतम् । अनुग्रहेण दयया आर्द्रं क्लिन्नं परीतं स्निग्धम् इति भावः । तेजः प्रतापः, प्रभावो वा । अविषह्यं सोढुमशक्यम् । अभ्यमित्रीणम् अमित्रान् अरीन् अभि

---

१३२. बुद्धिनैपुणम्

पातिनो गुणा येऽन्यत्रैकैकशोऽपि दुर्लभाः। द्विषतामेष चिरविल्व[133] द्रुमः, प्रह्वाणां तु चन्दनतरुस्तमुद्धृत्य † नीतिज्ञंमन्यमश्मकमिमं च राजपुत्रमनेन पित्र्ये पदे प्रतिष्ठितमेव विद्धि। नात्र संशयः कार्यः" इति।

[विश्रुतस्य शासनव्यवस्था]

४९. तच्चापि श्रुत्वा भूयोभूयश्चोपधा[134] भिर्विशोध्य तं मे मतिसहायमकरवम्। तत्सखश्च सत्यशौचयुक्तानमात्यान्

अभिमुखम् अलं गच्छतीति; तथाविधं तेजः। सन्निपातिनः एकत्र वर्तमानाः। एकैकशः पृथक् पृथक्। **द्विषतामिति**—द्विषतां शत्रूणाम्। चिरविल्वद्रुमः विषवृक्षः; चिरं बिलति भिनत्ति इति; 'चिरविल्वो नक्तमालः करजश्च करञ्जके' इत्यमरः; शत्रुरूपरोगनिवारणाय औषधमिव इति भावः। प्रह्वाणां नतानां भक्तिमतामित्यर्थः। चन्दनतरुः मलयजः;सुखप्रदः इति भावः। उद्धृत्य विनाश्य। नीतिज्ञम् नयकुशलम् आत्मानं मन्यते बोधति, तं नयकौशलाभिमानिनम्। अश्मकम् अश्मकस्य स्वामिनं वसन्तभानुम्। अनेन विश्रुतेन। पित्र्ये पदे पितुः राज्ये। प्रतिष्ठितम् स्थिरीकृतम्।

४९. **तच्चापीति**—तत् नालीजंघवचः। भूयो भूयः पुनः पुनः। उपधाभिः परीक्षणोपायैः। विशोध्य भावशुद्धिं विज्ञाय। मतिसहायं मतिषु आत्मविचारेषु सहायं सहायकम्, आत्मानुकूलमित्यभिप्रायः। तस्य आर्यकेतोः सखा मित्रं सः तत्सखः अहम्। सत्यशौचयुक्तान् भक्तिसद्भावादिसत्यप्रतिज्ञानं सत्यम्; कपटादिरहितः व्यवहारः शौचं-शुद्धिः, ताभ्यां युक्तान् विभूषितान्, सत्यशौचपरायणान् इति भावः।

---

१३३. चिलिविलि † ० तरुस्तदुद्धृत्य १३४. चोपदाभिः

विविधव्यञ्जनांश्च गूढपुरुषानुदपादयम् । तेभ्यश्चोपलभ्य लुब्धसमृद्धमत्युत्सिक्तमविधेयप्रायं च प्रकृतिमण्डलमलुब्धताम-भिख्यापयन्, धार्मिकत्वमुद्भावयन्, नास्तिकान् कदर्थयन्, कण्टकान्

अमात्यान् सचिवान् । विविधेति—विविधानि अनेकप्रकाराणि व्यञ्जनानि प्रच्छदादिरूपाणि येषां, तान् अनेकरूपान् विविधवेषधारिणः वा । गूढान् गुप्तचरान् पुरुषान् सेवकजनान् । उदपादयं नियोजितवान् । तेभ्यः गूढपुरुषेभ्यः । लुब्धश्चासौ समृद्धश्च, तं धनादेः गृध्नं धनिकम् । अत्युत्सिक्तं परमाभिमानयुतं सदर्पमित्यर्थः । अविधेयप्रायं बाहुल्येन सामान्येन वा अविधेयम् अप्रतिकारम् अवशीभूतं वा । प्रकृतिमण्डलं द्विसप्ततिप्रकृतीः, यथा कौटिल्येन अर्थशास्त्रे षष्टेऽधिकरणे द्वितीये-ऽध्याये प्रपञ्चितम् । अलुब्धताम् आत्मनः लोभरहितां प्रकृतिम्; अथवा अलोभस्य प्रशंसाम् इति भावोऽभिप्रेतः स्यात् । अभिख्यापयन सर्वत्र प्रचारयन् । धार्मिकत्वं धर्मप्रेमाचरणादिकम् आत्मनः प्रजानां वा । उद्भावयन् प्रकाशयन् । नास्तिकान् श्रुतिस्मृतिनिन्दकान् परलोके च विश्वासमकुर्वाणान् । तथा चाह मनुः—

> "योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः ।
> स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥
> नास्तिक्यं वेदनिन्दा च.......... ॥"

अत्र 'नास्ति परलोक इति बुद्धिम्' इति नास्तिक्यस्य कुल्लूकभट्टकृतं व्याख्यानम् । एतादृशान् वेदपरलोकादिष्वविश्वासपरायणान् । कदर्थयन् तिरस्कुर्वन् । कण्टकान् प्रजाकष्टकराः स्थितीः; कौटिल्यार्थशास्त्रे प्रजाभिः राजनियमानां भंगः, अग्निव्याधिदुर्भिक्षोदकमूषिकव्यालसर्परक्षांसि इति अष्टौ दैवानि कष्टानि, गुप्तचरादीनां जीवितसंशयादिकम् इत्येवं बहुविधाः कण्टकाः प्रतिपादिताः सन्ति; ते प्रजायाः शत्रुभूताः सन्तः कण्टकवत्

विशोधयन्, अमित्रोपधीर[१३५] पघ्नन्, चातुर्वर्ण्यं च स्वधर्मकर्मसु स्थापयन् अभिसमाहारेयमर्थान् । अर्थमूला हि दण्डविशिष्टकर्मारम्भाः । न चान्यदस्ति पापिष्ठं तत्र दौर्बल्यात् इत्याकलय्य योगानन्वतिष्ठम् ॥'

इति श्रीदण्डिनः कृतौ दशकुमारचरिते विश्रुतचरितं नामाष्टम

उच्छ्वासः ।

दुःखदायिनः, अतस्तेषां शोधनं नितरामावश्यकम् । विशोधयन् उद्धरन् । अमित्राणां शत्रूणाम् उपधीः कूटप्रयोगान् अपघ्नन् विफलयन् । चतुर्णां वर्णानां समूहः चातुर्वर्ण्यम् । अथवा-चत्वारो वर्णाः चतुर्वर्णाः, तेषां भावः चातुर्वर्ण्यम् । स्वधर्मकर्मसु स्वकर्त्तव्यकर्मसु । स्थापयन् स्थिरीकुर्वन् । अभिसमाहरेयम् आचिनुयाम् । अर्थेति—अर्थः धनादिकं मूलम् आश्रयः येषां, ते धनाश्रिताः । दण्डेन राजनीत्या विशिष्टाः उपलक्षिताः कर्मणां कार्याणाम् आरम्भाः प्रवर्तनानि, अथवा—दण्डानां दण्डसाध्यानां विशिष्टानां च कर्मणाम् आरम्भा उद्योगाः" इति बालबोधिनी । अन्यद् भिन्नम् । पापिष्ठम् अतिशयेन पापि (=पापम्); निकृष्टं दोषपूर्णं वा कर्म इति यावत । तत्र राजनीतिकर्मारम्भेषु । दौर्बल्यात् दुर्बलस्य भावः, तस्मात्; दौर्बल्यं परित्यज्य इति भावः । आकलय्य विचिन्त्य । योगान् विविधान् उपायान् । अन्वतिष्ठम् प्रयुक्तवान् ।

इति डा० सुधीरकुमारगुप्तविरचितायां सुधीरिण्यां भावप्रकाशिकायां टीकायां विश्रुतचरितं नाम अष्टम उच्छ्वासः ।

---

१३५. उपघ्नन्

दशकुमारचरिते

उत्तरपीठिकायां

विश्रुतचरितभागः

[विश्रुतस्य नीतिः]

५०. व्यचिन्तयञ्च—'सर्वोऽप्यतिशूरः सेवकवर्गो मयि तथा ऽनुरक्तो यथाऽऽज्ञया जीवितमपि तृणाय मन्यते । राज्य-द्वितयसैन्यसामग्र्या च नाहमश्मकेशा[1]द्वसन्तभानोर्न्यूनो नीत्या-

---

उत्तरपीठिकायां विश्रुतकथाभागः

सुधीरिणी भावप्रकाशिका टीका

अष्टमोच्छ्वासस्य समाप्तौ अपि विश्रुतचरितं समाप्ति न यातम् । अतोऽत्र तदवशिष्टमंशं प्रस्तौति दण्डिशिष्यः कश्चित् कविः । आर्यकेतु प्राप्य, विविधरूपान् गूढपुरुषान् नियोज्य, योगान् अनुष्ठाय, स विश्रुतः वसन्तभानुमुच्छेत्तु कामयमानो विचारयति ।

५०. व्यचिन्तयमिति—व्यचिन्तयं विचारमकरवम् । अति-शयेन शूरः परमवीरः । सेवकानां राजपुरुषाणां वर्गः समुदायः । अनुरक्तः भक्तः । जीवितं प्राणान् । तृणाय मन्यते त्यक्तुमुद्यत इति भावः । राज्येति—राज्ययोः द्वितयम् । द्वे राज्ये तु मित्रवर्मप्रचण्डवर्मणोः आस्ताम् । तयोः राज्ययोः सैन्यस्य सामग्र्या; विपुलसेनया युक्तः इति भावः । नेति—वसन्तभानुरपि राज्यद्वयशक्तिसम्पन्नः—स्वकीयं राज्यम्

---

१. अश्मकेन्द्राद्

